# संस्कृतसुधा

## दशमी कक्ष्या

### संयुक्तपाठ्यक्रमः

*10th Sanskrit Reader (Composite Course)*

**© Government of Andhra Pradesh, Amaravati**

*First Published 2014*

*New Impressions 2019, 2020, 2021, 2022, 2023, 2024, 2025,2026*

**DISCLAIMER**
Any form of copying of the content, information and illustrations from this text book is a punishable offence.

**All rights reserved**

No part of this publication may be reproduced, stored in a retrieval system, or transmitted, in any form or by any means without the prior permission in writing of the publisher, nor be otherwise circulated in any form of binding or cover other than that in which it is published and without a similar condition including this condition being imposed on the subsequent purchaser.

The copyright holder of this book is the Commissioner of School Education, Amaravati, Andhra Pradesh.

This book has been printed on 70 G.S.M. SS Maplitho Title Page 220 G.S.M. White Art Card

**Published by Samagra Shiksha, Government of Andhra Pradesh, Amaravati.**

Printed in India
at the A.P. Govt., Text Book Press
Amaravati, Andhra Pradesh

AP SCERT

# अध्यापकेभ्यः सूचनाः

- ❖ अध्यापकैः पाठ्यपुस्तकस्य उपयोगात् पूर्वं पाठ्यपुस्तकद्वारा अपेक्षितानि सामर्थ्यानि ज्ञातव्यानि । पुरोवाक्, विषयसूची इत्यादिकम् अवश्यं पठनीयम् ।
- ❖ पाठ्यपुस्तकं प्रथमभाषात्वेन पठ्यमानायाः तेलुगुभाषायाः अनुबन्धरूपेण उपयोक्तव्यम्।
- ❖ मातृभाषायाः बोधनार्थं सप्ताहे चत्वारः कालांशाः उपयोक्तव्याः। संस्कृतस्य पाठनाय कालांशद्वयं उपयोक्तव्यम्।
- ❖ एतस्य पाठ्यपुस्तकस्य बोधनार्थम् एकस्मिन् विद्यासंवत्सरे प्रायशः ६४ कालांशाः भवन्ति ।
- ❖ प्रत्येकमपि पाठस्य अष्टौ कालांशाः इति क्रमेण ४८, आहत्य संस्कृतपाठनार्थं निर्दिष्टान् कालांशान् दृष्टौ निधाय इदं पाठ्यपुस्तकं निर्मितम् । तदनुगुणं कालांशविभजनं कृत्वा प्रणालिका रचनीया । बोधनाभ्यासप्रक्रियाश्च निर्वोढव्याः ।
- ❖ अष्टसु कालांशेषु पाठगतस्य विषयस्य बोधनाय द्वे/त्रयः कालांशाः उपयोक्तव्याः । अवशिष्टकालांशान् उन्मुखीकरणाय, गणशः पाठनाय, अर्थावगमनाय, अभ्यासान् कारयितुं, व्यक्तिगतपाठनाय च उपयोक्तव्याः ।
- ❖ पाठबोधनस्य अपेक्षया अभ्यासान् कारयितुमेव अधिकाः कालांशाः उपयोक्तव्याः। एतदर्थम् आवश्यकतानुसारम् उपाध्यायः छात्राणां साहाय्यं कुर्यात् ।
- ❖ पुस्तके छात्रैः साधनीयानां सामर्थ्यानां सूची अस्ति । अध्यापकाः छात्रैः तानि सामर्थ्यानि साधयेयुः ।
- ❖ सर्वस्य पाठस्य आरम्भे **'पठन्तु-विचिन्त्य-वदन्तु' इत्यंशः** अस्ति। तदधिकृत्य छात्रैः सम्भाषणं कारयितव्यम् । शिक्षकाः तदर्थं दत्तान् प्रश्नान् अतिरिच्य चिन्तयितुं योग्यान् अन्यानपि प्रश्नान् प्रष्टुं शक्नुवन्ति ।
- ❖ छात्राणां व्यक्तिशः पठनं प्रथमं भवेत्। ततः आवश्यकतानुसारं गणशः कार्यं दातव्यम्। कक्ष्याप्रकोष्ठे गणशः कार्याणां प्रदर्शनानन्तरं तद्गतानां दोषाणां निराकरणं चर्चया कुर्युः ।

  **१. भावावगमनम् प्रतिस्पन्दनम् -**

  अत्रस्थानि **शृण्वन्तु, विचिन्त्य वदन्तु** कृत्यानि पूर्णतया कक्ष्याप्रकोष्ठे एव कारयितव्यानि ।

  **पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु** इतीमानि कृत्यानि व्यक्तिशः अथवा गणशः कारयितव्यानि।

  **२. भावव्यक्तीकरणम् - सर्जनात्मकता**

  अत्रस्थानि **स्वीयरचना, सर्जनात्मकव्यक्तीकरणम्, प्रशंसा** इत्येतानि सामर्थ्यानि उद्दिश्य लेखनार्थं सम्पूर्णकक्ष्यायां सूचनाः देयाः । तदनन्तरं छात्रैः एतानि सामर्थ्यानि कारयितव्यानि ।

  **३. भाषांशाः -**

  अत्रस्थानि **पदजालाभिवृद्धिसम्बद्धानि -** कृत्यानि गणशः कारयितव्यानि । ततः व्यक्तिशः लेखनीयानि।

  **व्याकरणम् -** व्याकरणांशानां बोधनसमये उदाहरणानि **कृष्णफलके लेखनीयानि।** ततः चर्चया विषयावगमनं कारयितव्यम् । ततः अभ्यासाः कारयितव्याः ।
- ❖ छात्रैः लिखितविषयगतानां दोषाणां निवारणार्थं कक्ष्याप्रकोष्ठे चर्चा आयोजनीया । चर्चासमये क्रमशः भावः, वाक्यनिर्माणम्, पदानामौचित्यम् अक्षरदोषाः च विमृष्टव्याः । आत्मना कृतान् दोषान् छात्राः स्वयमेव जानीयुः। तदनन्तरं व्यक्तिशः एव वाक्यादिकं लेखनीयम् इति सूचनीयम् ।
- ❖ **परियोजनाकार्यमपि** एवमेव कारयेयुः ।
- ❖ पाठ्यांशस्य बोधनं नाम 'पठन्तु - विचिन्त्य वदन्तु' इति उन्मुखीकरणमित्यंशात् आरभ्य परियोजनाकार्यम् इति शीर्षिकापर्यन्तं भवति इति विषयः मनसि स्थापनीयः । एतदर्थम् अध्यापकाः सन्नद्धाः भवेयुः ।
- ❖ एतदर्थम् अध्यापकाः वार्षिक - पाठ्यप्रणालिकाः रचयेयुः ।

AP SCERT

❖ वार्षिकप्रणालिकायाम् अधो लिखितांशाः भवन्ति ।

१. कक्ष्या　　२. विषयः　　३. अपेक्षितकालांशानां सङ्ख्या

४. विद्यासंवत्सरसमाप्तेः पूर्वं साधितव्यानि सामर्थ्यानि　　५. मासक्रमेण पाठविभजनम्

| मासनाम | बोध्यमानपाठः | अपेक्षित - कालांशाः | बोधनव्यूहाः | अपेक्षितसंसाधनानि /सामग्री | व्याख्या |
|---|---|---|---|---|---|
| | | | | | |

६. उपाध्यायस्य प्रतिस्पन्दनानि　　७. प्रधानोपाध्यायस्य परामर्शाः सूचनाश्च

❖ प्रत्येकमपि पाठेन साधितव्यानां सामर्थ्यानां साधनाय प्रणाली संरचनीया । संस्कृते पाठ्यप्रणाली अधो दत्तप्रकारेण निर्मातव्या ।

१. पाठस्य नाम -　　२. पाठं बोधयितुम् आवश्यककालांशाः -

३. साधितव्यानि सामर्थ्यानि -　　४. कालांशानुसारं विभागः -

| कालांश-सङ्ख्या | बोधनांशः | बोधनव्यूहाः | सामग्री /संसाधनानि |
|---|---|---|---|
| | | | |

५. पाठ्यबोधनार्थम् अपेक्षितविषयसङ्ग्रहणम् (अध्यापककृत्यम्)।

६. पाठ्यबोधनानन्तरम् अध्यापकस्य प्रतिस्पन्दनानि (अनुभवाः, अनुभूतयश्च) ।

❖ अध्यापकः 'एतानि कुर्वन्तु' इति शीर्षिकागतांशेषु एकैकः अंशः कतिभिः छात्रैः साधितः इति परिशीलयेत्। आवश्यकतानुसारं वैकल्पिकांशान् बोधयेत् ।

❖ सामर्थ्यसाधनार्थं कदापि मार्गदर्शिकाम् (Guide), अध्ययनसामग्रीं (Study material) वा दृष्ट्वा प्रश्नानां समाधानानाम् अभ्यासानां वा लेखनं न कारयेत् । यद्येवं दृष्ट्वा लिख्यते तर्हि अङ्काः न प्रदीयन्ते इति वदेत् । छात्रैः स्वीयबुद्ध्या लिखितांशानेव परिशीलयेत् ।

❖ पाठ्यांशबोधनसमये अधः दत्तानि सोपानानि अनुसरणीयानि ।

I. **उपोद्घातः** - स्वागतभाषणम्, उन्मुखीकरणम्, शीर्षिकाप्रकटनम्, नेपथ्यम् ।

II. **पाठ्यांशबोधनस्य / सामर्थ्यस्य अवगमनम्** - चित्राण्युद्दिश्य भाषणम्, छात्राणां बाह्यपठनम् अध्यापकस्य आदर्शपठनम्, छात्राणां मौनपठनम्, छात्रैः अर्थसङ्ग्रहणम्, पाठितविषये चर्चा अवगमनमञ्च।

III.**अवगमनपरिशीलनम्** - पाठितविषयाणां छात्रावगमनस्य परिशीलनम् ।

IV.**गृहकार्यम्** - (प्रशंसा - परियोजनाकार्य - बोधितविषयैः सम्बद्धं गृहकार्यम्)

❖ पाठ्यांशानाम् आधारेण यथावकाशं मानवीयमूल्यानि, पर्यावरणम्, कलाः, अनुभवः, जीववैविध्यम् इत्यादिविषयाः चर्चनीयाः।

❖ अनुबन्धे शब्दाः, धातवश्च दत्ताः सन्ति । पाठ्यांशेषु कृत्यानाम् अभ्याससमये सन्दर्भानुसारम् अनुबन्धे दत्तानां शब्दानां धातूनां च अभ्यासः छात्रैः कारयितव्यः ।

❖ संस्कृतसाहित्ये अभिरुच्युत्पादनार्थं पाठशालाग्रन्थालये संस्कृतस्य प्राचीनग्रन्थाः आधुनिकग्रन्थाः च स्थापनीयाः।

❖ जीवने विविधसन्दर्भेषु संस्कृतभाषाम् उपयोक्तुम् आवश्यकं शिक्षणं छात्रेभ्यः दातव्यम् । (उदा - सभानिर्वहणं, प्रसङ्गः, चर्चासु भागग्रहणं, लेखानां लेखनं, अपरिचितान् अंशान् पठित्वा अवगमनं, विषयविशेषस्य विश्लेषणात्मकं विवरणम् इत्यादिकम्)

AP SCERT

# राष्ट्रियगीतम्

- रवीन्द्रनाथ् टागूर्

जनगणमन अधिनायक जय हे !
भारतभाग्यविधाता !
पञ्जाब सिन्धू गुजरात मराठा,
द्राविड उत्कल वङ्ग !
विन्ध्य हिमाचल यमुना गङ्गा
उच्चलजलधितरङ्गा !
तव शुभ नामे जागे !
तव शुभ आशिष मागे !
गाहे तव जय गाथा !
जनगणमङ्गलदायक जय हे
भारतभाग्यविधाता !
जय हे ! जय हे ! जय हे !
जय जय जय जय हे !

# प्रतिज्ञा

- पैडिमर्रि वेंकटसुब्बाराव

भारतदेशः मम मातृभूमिः । भारतीयास्सर्वे मम सहोदराः ।

अहं मम देशं प्रीणामि । सुसम्पन्ना, बहुविधा भारतीया सांस्कृतिकसम्पत् मम गर्वकारणम् । तस्याः योग्यजनो भवितुं सर्वदा अहं परिश्रमं करोमि ।

मम मातापितरौ, उपाध्यायान्, ज्येष्ठान् सर्वान् च पूजयामि। सर्वैस्सह सगौरवं व्यवहरामि ।

मम देशस्य विषये, प्रजानां विषये सेवानिरतिं भजामि । जन्तूनां विषये दयालुः भवामि इति च प्रतिज्ञां करोमि ।

सर्वेषां श्रेयोऽभिवृद्धयः एव मम आनन्दस्य कारणम् ।

AP SCERT

# विषयसूची


| पाठस्य नाम | प्रक्रिया | मासः | पृष्ठसङ्ख्या |
|---|---|---|---|
| **प्रथमः भागः** | | | |
| १. लोकहितं मम करणीयम् | गीतम् | जुलै | 01 -07 |
| २. परोपकाराय सतां विभूतयः | काव्यश्लोकाः | अगस्ट् | 08 -17 |
| **द्वितीयः भागः** | | | |
| ३. स्वावलम्बनम् | कथा | सेप्टेम्बर् | 18 -24 |
| ४. वयं शिक्षेम तिर्यग्भ्यः | नीतिश्लोकाः | अक्टोबर् | 25 -31 |
| **तृतीयः भागः** | | | |
| ५. वृद्धोपदेशः | नाटकम् | नवम्बर्, | 32 -39 |
| ६. विवेकध्वनिः | निबन्धः | नवम्बर् | 40 -45 |
| पुनश्चरणम् | | डिसम्बर्, जनवरी, फ्रिब्रवरी, मार्च्, | |

**अनुबन्धः**

| | |
|---|---|
| शब्दरूपाणि | 46 -47 |
| धातुरूपाणि | 48 -50 |
| पदकोशः | 51 -53 |
| क्रियापदकोशः | 54 |


❖ अध्यापकः पाठ्यांशस्थान् नक्षत्रचिह्नितान् श्लोकान् छात्रैः कण्ठस्थान् कारयेत् ।

AP SCERT

# अनेन पाठ्यपुस्तकेन छात्रैः साधितव्यानि सामर्थ्यानि

## I. भावावगमनम् - प्रतिस्पन्दनम्

- ❖ गीतानि, श्लोकाः, सम्भाषणानि, कथाः इत्यादीन् विषयान् श्रुत्वा छात्राः अवगच्छेयुः। तेषां भावान् मातृभाषया वक्तुं शक्नुयुः।
- ❖ संस्कृतेन पृष्टान् प्रश्नान् छात्राः अवगच्छेयुः। तेषां योग्यानि समाधानानि संस्कृतेन वदेयुः। तथैव ज्ञातान् विषायान् अधिकृत्य संस्कृतेन वदेयुः।
- ❖ लघूनि संस्कृतभाषणानि कर्तुं शक्नुयुः।
- ❖ श्लोकाः, कथाः, गीतानि, सम्भाषणानि, आत्मकथाः, निबन्धाः, लेखाः इत्यादिसंस्कृतविषयान् अवगच्छेयुः धाराप्रवाहतया पठेयुश्च।
- ❖ पाठितस्य विषयस्य आधारेण दत्तानां प्रश्नानां समाधानानि लिखेयुः। पठनावगमनस्थानि कृत्यानि निर्दोषं कुर्युः।
- ❖ अपरिचितानां कथानां पत्रिकाणां च पठनेन विषयान् अवगच्छेयुः।
- ❖ कवीनां रचयितॄणां च रचनाविधानं प्रशंसितुं शक्नुयुः।
- ❖ स्फूर्तिप्रदं विषयमधिकृत्य लिङ्ग-धर्म-वर्गादिभेदान् विना प्रशंसां कुर्युः।
- ❖ अन्येषां संस्कृतिसम्प्रदायान् प्रशंसेयुः।

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

- ❖ ज्ञातान् दृष्टान् श्रुतान् च विषयान् उद्दिश्य स्वप्रतिस्पन्दनं संस्कृतेन लेखितुं शक्नुयुः।
- ❖ बहुसमाधानवतां प्रश्नानां संस्कृतेन उत्तराणि लिखेयुः।
- ❖ आत्मानं तत्तत्सन्दर्भे ऊहित्वा तत्र 'अहं किं कर्तुं शक्नुया'मिति विचिन्त्य प्रत्येकमपि छात्रः संस्कृतेन स्वानुभवं लेखितुं शक्नुयात् ।
- ❖ कथां सम्भाषणरूपेण सम्भाषणं निबन्धरूपेण इति क्रमेण प्रक्रियापरिवर्तनं कर्तुं शक्नुयुः।
- ❖ कथाः, गीतानि, कविताः स्मरेयुः स्वयं रचयेयुः च ।
- ❖ लेखानां लेखनसामर्थ्यं प्राप्नुयुः । चित्राणां लेखनं तेषां वर्णनं च स्वयं कर्तुं शक्नुयुः।
- ❖ तेलुगुभाषांशानाम् अनुवादं संस्कृतेन कर्तुं शक्नुयुः ।

## III. भाषांशाः

- ❖ पाठ्यमानेषु अथवा श्रूयमाणेषु विषयेषु स्थितानां नूतनपदानां सन्दर्भानुगुणम् अर्थं ग्रहीतुं शक्नुयुः।
- ❖ ज्ञातपदानामाधारेण नूतन वाक्यानि लेखितुं शक्नुयुः।
- ❖ समानार्थकपदानि विरुद्धार्थकपदानि च ज्ञातुं शक्नुयुः।
- ❖ भाषाभागान् व्याकरणांशान् च ज्ञातुं शक्नुयुः। विभक्तीः अवगच्छेयुः । तासां प्रामुख्यम् अवगत्य विना दोषं तासां प्रयोगसामर्थ्यं प्राप्नुयुः ।
- ❖ वाक्यभेदान् जानीयुः। तत्तद्वाक्यानि स्वयं प्रयोक्तुं च शक्नुयुः।
- ❖ लिङ्गभेदान् दोषं विना प्रयुञ्जीरन् ।
- ❖ कालानुसारं लकाराणां पुरुषाणां च प्रयोगे समर्थाः भवेयुः ।
- ❖ सन्धीनां संयोजने, विघटने, समासानां विग्रहवाक्यानां च प्रयोगे समर्थाः भवेयुः।

AP SCERT

प्रथमः भागः

# १. लोकहितं मम करणीयम्

L3E3B8

## पठन्तु, विचिन्त्य वदन्तु

शिवः - किं भोः । भवतः प्रकोष्ठे बहूनां देशभक्तानां चित्राणि सन्ति ?
कार्तिकः - आम् सत्यम् । तेषां जीवनम् अस्माकं सर्वदा प्रेरणादायकं भवति खलु ।
शिवः - तत् कथम् ?
कार्तिकः - पश्यतु । सा वीरनारी झान्सी लक्ष्मीबाई अस्ति । युद्धरङ्गे लघुशिशुं धृत्वा भारतस्य स्वातन्त्र्यं प्राप्तुं शतृभिः सह युद्धं कृत्वा स्वप्राणानेव समर्पितवती ।तादृशाः अनेके देशभक्ताः देशार्थं समर्पितजीवनाः सन्ति ।
शिवः - आम्, तादृशानां त्यागेनैव वयमधुना स्वतन्त्राः स्मः ।
कार्तिकः - तं पश्यतु । सः विवेकानन्दः । सः महागुरुभक्तः भारतीयसंस्कृति-धर्मप्रवर्तकः च अस्ति ।
शिवः - तस्य वचनानि यूनां हृदयेषु धैर्योत्साहौ प्रेरयन्ति ।
कार्तिकः - सः सर्दार्वल्लभभाईपटेलः वर्तते । सः महानुभावः स्वातन्त्र्यसम्पादनानन्तरं देशसमैक्यार्थं साहसोपेतकार्यं कृतवान् ।
शिवः - एते सर्वेऽपि सर्वमेतत् कथमसाधयन् ?
कार्तिकः - मित्र ! एतत् सर्वं तैः कथं साधितमिति गीतरूपेण एतेषां जीवनं लक्ष्यं च कथमासीदिति जानीमः ।

## प्रश्नाः ?

१. द्वयोः मित्रयोः केषां विषये चर्चा प्राचलत् ?

२. अनेन संवादेन महापुरुषाणां जीवनं कथमासीदिति ज्ञायते ?

३. देशभक्तानां, समाजसेवकानां च जीवनम् उद्दिश्य वदतु ।

## उद्देश्यम्

अद्यतनमनुष्येषु स्वार्थचिन्तनम् अभ्यवर्धत । तेषु अहं, मदीयम् इति स्वार्थ भवानां विना इतरेषां चिन्तनं नास्ति । अतः समाजस्य हितकरणे एव सन्तोषः अस्ति, तदेव अस्मत् कर्तव्यमिति, अस्मान् परितः विद्यमानानाम् आपद्गतानां जनानां साहाय्यं करणीयमिति च छात्रेषु स्फूर्तेः उत्पादनम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

AP SCERT

मनसा सततं स्मरणीयम्
वचसा सततं वदनीयम्
लोकहितं मम करणीयम् ॥ मनसा ॥

न भोगभवने रमणीयम्
न च सुखशयने शयनीयम्
अहर्निशं जागरणीयम्
लोकहितं मम करणीयम् ॥ मनसा ॥

न जातु दुःखं गणनीयम्
न च निजसौख्यं मननीयम्
कार्यक्षेत्रे त्वरणीयम्
लोकहितं मम करणीयम् ॥ मनसा ॥

दुःखसागरे तरणीयम्
कष्टपर्वते चरणीयम्
विपत्तिविपिने भ्रमणीयम्
लोकहितं मम करणीयम् ॥ मनसा ॥

गहनारण्ये घनान्धकारे
बन्धुजना ये स्थिता गह्वरे
तत्र मया सञ्चरणीयम्
लोकहितं मम करणीयम् ॥ मनसा ॥

- डा. श्रीधर भास्कर वर्णेकर





## गीतस्य भावः

నేను ఎల్లప్పుడు లోకహితాన్ని గురించే మనస్సులో స్మరించాలి. మాటలతో దాన్నే చెప్పాలి. ఆ పనినే చెయ్యాలి. ఇదే నా కర్తవ్యం.

నేను భవనాలలో ఐహికభోగాలను అనుభవించకూడదు. మెత్తటిపరుపులపైన సుఖంగా నిద్రపోకూడదు. పగలూ-రాత్రి నేను మేలుకొని ఉండాలి. ఎందుకంటే లోకహితమే నా కర్తవ్యం.

నేను ఏ సమయంలోనూ దుఃఖాన్ని లెక్కపెట్టకూడదు. నా సౌఖ్యం గురించి ఆలోచించకూడదు. కార్యక్షేత్రంలో ఉన్న పనిని త్వరగా పూర్తి చేయాలి. ఎందుకంటే లోకహితమే నా కర్తవ్యం.

నేను దుఃఖసముద్రాన్ని దాటాలి, కష్టాలనే పర్వతంమీద సంచరించాలి. ఆపదలనే అరణ్యంలో తిరగాలి. ఎందుకంటే లోకహితమే నా కర్తవ్యం.

దట్టమైన అడవిలో, గాఢాంధకారంలో నా బంధువులు గుహలో చిక్కుకొని కష్టపడుతున్నారు. నేనక్కడికి వెళ్ళాలి. వారిని రక్షించాలి. ఎందుకంటే లోకహితమే నా కర్తవ్యం.

### कविपरिचयः

प्रस्तुतगीतस्य रचयिता डा. श्रीधरभास्करवर्णेकरमहोदयः । अयं कविवरेण्यः विंशतेः शताब्दस्य पूर्वभागे नागपूरे जन्म अलभत । अल्पे वयस्येव व्याकरणसाहित्यवेदान्तादिविषयान् सम्यगधीत्य नाटकखण्डकाव्यमहाकाव्यगीतिकाव्यादीनि शताधिकानि व्यरचयत् । अस्य सम्पूर्णं साहित्यं ''प्रज्ञाभारतीयम्'' इति ग्रन्थे सङ्गृहीतमस्ति । अनेन प्राप्तेषु अनेकेषु पुरस्कारेषु ''प्रज्ञाभारतीपुरस्कारः'' विख्यातो वर्तते । 'लोकहितं मम करणीयम्' इति गीतरूपः प्रस्तुतपाठ्यांशः प्रज्ञाभारतीयम् इति ग्रन्थात् स्वीकृतः ।

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. गीतमिदं किं वर्णयति ?
२. गीतस्य 'लोकहितं मम करणीयम्' इति नाम समुचितं वा ? किमर्थम् ?
३. लोकहितार्थं किं किं करणीयम् ?

**आ) अधः दत्तं खण्डद्वयं योजयित्वा लिखन्तु ।**

| | क | ख | क + ख |
|---|---|---|---|
| १. | कष्टपर्वते | भ्रमणीयम् | ------------------------------- |
| २. | कार्यक्षेत्रे | न रमणीयम् | ------------------------------- |
| ३. | भोगभवने | चरणीयम् | ------------------------------- |
| ४. | निजसौख्यम् | त्वरणीयम् | ------------------------------- |
| ५. | विपत्तिविपिने | न मननीयम् | ------------------------------- |

इ) अधः दत्तं गीतचरणं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

**क्षमा - दया - स्नेह - विनय - सत्य - शील - सेवानां**
**सुगुणानां समृद्धये क्रमाभ्यासमाचराम**
**सवनेषु सभाङ्गणेषु मार्गेषु च मन्दिरेषु**
**यदा कदापि यत्र वा नियमान्नहि विस्मराम ।**

१. के गुणाः अस्माभिः प्राप्तव्याः ?
२. गुणानां समृद्धये किं करणीयम् ?
३. गीतचरणे प्रयुक्तानां विविधस्थानानां नामानि लिखन्तु ।

ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. अहर्निशं कथं लोकहितं करणीयम् ?
२. लोकहितं कर्तुं कुत्र भ्रमणीयम् ?
३. लोकहितार्थं कुत्र सञ्चरणीयमिति कविः वदति ?
४. भोगभवने किमर्थं न रमणीयम् ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ?

१. लोकहितं करणीयमिति कः वदति, किमर्थञ्च ?
२. अहर्निशं जागरणीयम् इति लेखने कवेः उद्देश्यं किम् ?
३. कार्यक्षेत्रे त्वरणीयम् इति गीते अस्ति । यदि न त्वर्यते तर्हि किं भवति?
४. गीतपठनेन भवान् किम् अनुभूतवान् ?

आ) अधः दत्तायोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. लोकहितं कथं करणीयम् ?
२. लोकहितार्थं भवन्तः किं करिष्यन्ति ?

इ) सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।

१. गीते स्थितानि नीतिवाक्यानि लिखन्तु ।
२. लोकहितं करणीयमिति प्रेरयन् मित्राय पत्रं लिखन्तु ।
३. अधः दत्तमनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

పూర్వం భారతదేశాన్ని జంబూద్వీపం అని పిలిచేవారు. దానికి కారణం ఈ ప్రాంతం నిండా జంబూవృక్షాలు అధికసంఖ్యలో ఉండటమే. ఈ నేరేడు అనేకదేశాలలో పెరుగుతుంది. దీనికి వేగంగా పెరిగే గుణం కూడా ఉంది. వనవాసకాలంలో శ్రీరాముడు ఈ పండ్లనే ఎక్కువగా తీసుకునేవాడని కొందరి విశ్వాసం.

AP SCERT

## III. भाषांशाः

### 1. पदजालाभिवृद्धिः

अ) प्रथमं कोष्ठकस्थैः समुचितपदैः रिक्तस्थानानि पूरयित्वा तान्येव पदान्युपयुज्य पदरञ्जनीं पूरयन्तु ।

| | | | | | |
|---|---|---|---|---|---|
| तरणीयं | करणीयं | त्वरणीयं | वदनीयं | रमणीयं | स्मरणीयं |
| चरणीयं | भ्रमणीयं | शयनीयं | जागरणीयं | मननीयं | गणनीयं |

**उपरिष्टात्**

१) नदीजलं नौकायाः साहाय्येन ---------------
२) सत्कार्यं कर्तुं सर्वदा ---------------
३) सूर्योदयात्पूर्वं छात्रैः --------------- (↑) (ऊर्ध्वमुखम्)
४) लोकहिताय दुःखारण्ये --------------- (↑) (ऊर्ध्वमुखम्)
५) अधीतं विज्ञानं ---------------
६) सत्यमेव सर्वदा ---------------

**तिर्यक्**

१) दैवं सततं ---------------
२) गृहकार्यं कृत्वैव रात्रौ शीघ्रं ---------------
३) सर्वदा परहितं ---------------
४) उद्यानवने मित्रैस्साकं ---------------
५) परेषां दोषजालं न ---------------
६)




AP SCERT

आ) रेखाङ्कितपदान्युपयुज्य स्वीयवाक्यानि लिखन्तु ।

१. छात्राः सततं गुरुवचनं स्मरेयुः ।
२. श्रामिकाः अहर्निशं कार्यं कुर्वन्ति ।
३. बन्धुजनाः अस्माकं हितमिच्छन्ति ।
४. सर्वेणापि लोकहितं चिन्तनीयम् ।

इ) पाठं पठित्वा 'लोकहितं' इति पदं विवृण्वन्तु ।

## 2. व्याकरणांशाः

अ) अधः दत्तैः समस्तपदैः सह विग्रहवाक्यानि योजयन्तु ।

| | |
|---|---|
| १. अहर्निशम् | लोकाय हितम् |
| २. विपत्तिविपिने | दुःखमेव सागरः, तस्मिन् |
| ३. लोकहितम् | अहः निशा च तयोः समाहारः |
| ४. दुःखसागरे | विपत्तिरेव विपिनम्, तस्मिन् |

आ) समुचितविभक्तिरूपैः वाक्यानि पूरयन्तु ।

१. अहं ........................ पठामि । (पाठ - द्वितीया)
२. छात्राः........................ धावन्ति । (क्रीडाङ्गण - सप्तमी)
३. सर्वे ........................ पश्यन्ति । (नेत्र - तृतीया)
४. बालः ........................ शुनकं ताडयति । (दण्ड - तृतीया)
५. हे....................उत्तिष्ठन्तु स्वजातिरक्षणाय । (युवक - सम्बोधन प्रथमा)
६. संस्कृते प्रसिद्धानि पञ्च .............. सन्ति । (महाकाव्य - प्रथमा)

इ) कोष्ठकस्थानि अव्ययपदानि उपयुज्य रिक्तस्थानानि पूरयन्तु ।

( च, यथा, किन्तु, अपि, तथा, इति )

१. कालिदासः कविकुलगुरुः --------------------- प्रसिद्धः ।
२. ----------------- राजा ------------------- प्रजाः ।
३. माता वदति, भवान् अधुना ------------------------ क्रीडति वा ?
४. रमेशः उत्तमतया पठति, ----------------------- सः चपलः ।



AP SCERT

५. अहं विद्यालये गणितं, विज्ञानं संस्कृतभाषां ---------------------- पठामि ।

**ई) अधः दत्तात् अनुच्छेदात् कर्तृ - कर्म - क्रियापदानि चित्वा पेटिकायां लिखन्तु ।**

छात्राः प्रातः काले विद्यालयं गच्छन्ति । विद्यालये विविधविषयान् पठन्ति । तेषु विषयेषु संस्कृतं सरलम् इति चिन्तयन्ति । सायंकाले क्रीडाङ्गणे बहुविधाः क्रीडाः आनन्देन क्रीडन्ति । तथा क्रीडनेन स्वास्थ्यं सम्यक् भवति ।

| कर्तृपदानि | कर्मपदानि | क्रियापदानि |
|---|---|---|
| | | |

**उ) अधः दत्तानां रेखाङ्कितपदानां वचनं परिवर्त्य पुनः सम्पूर्णवाक्यं लिखन्तु ।**

१. बालकः गृहं गच्छति ।
२. आम्रं मधुरं भवति ।
३. अहं गुरुं नमामि ।
४. बालिकाः गीतं गायन्ति ।
५. वानरेण फलं खाद्यते ।
६. देवालये प्रतिमा विद्यते ।
७. दुर्जनात् सज्जनः भीतिम् अनुभवति ।
८. गुरोः आशीर्वादः आवश्यकः ।

**परियोजनाकार्यम्**

''मम दायित्वम्'' इति शीर्षिकामुखेन भवन्तः देशहिताय किं करिष्यन्ति इति भित्तिपत्रे लिखित्वा प्रदर्शयन्तु ।

**अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।**

AP SCERT

# २. परोपकाराय सतां विभूतयः

M9B9R5

## पठन्तु, विचिन्त्य वदन्तु

( राजेशः रमेशश्च ग्रन्थालये सम्भाषणं कुरुतः ।)

राजेशः - रमेश ! एतानि कानि पुस्तकानि ? किमर्थम् एतेषां विभागं कृतवन्तः?

रमेशः - राजेश ! एतानि संस्कृतपुस्तकानि । एतानि काव्यानि, नाटकानि, पुराणानि इत्यादिक्रमेण विभज्य स्थापितवन्तः ।

राजेशः - अस्माकं संस्कृतपाठ्यपुस्तकेषु एतेभ्यः पुस्तकेभ्यः स्वीकृतपाठाः सन्ति वा ?

रमेशः - आम् । अस्माकं संस्कृतपुस्तकेषु काव्येभ्यः, नाटकेभ्यः दर्शनेभ्यः च स्वीकृताः पाठाः सन्ति ।

राजेशः - वयं तान् पाठान् कदा पठिष्यामः ?

रमेशः - अद्यैव अस्माकं संस्कृताध्यापकः रघुवंशमहाकाव्यात् स्वीकृतं पाठं पाठयति । आगच्छ, कक्ष्यां गच्छावः ।

## प्रश्नाः ?

१. छात्रौ द्वौ केषां विषये चर्चां कुरुतः ?
२. वाङ्मये कीदृशग्रन्थाः सन्ति ?
३. केषाञ्चन ग्रन्थानां नामानि वदन्तु ।

## उद्देश्यम्

* गुरुशिष्ययोः अनुबन्धस्य, यज्ञयागादिकानां महत्त्वस्य, दानगुणस्य विशिष्टतायाः, राज्ञां जीवनशैल्याः सूर्यवंशराजानां गुणगणानां च अवगमनम् ।
* रघुवंशमहाकाव्यस्य संस्कृतमहाकाव्यानां च वैशिष्ट्यावबोधनम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।



AP SCERT

*	तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोशजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः ।। १ ।।

स मृन्मये वीतहिरण्मयत्वात्पात्रे निधायार्घ्यमनर्घशीलः ।
श्रुतप्रकाशं यशसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः ।। २।।

तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मानधनाग्रयायी ।
विशांपतिर्विष्टरभाजमारात्कृताञ्जलिः कृत्यविदित्युवाच ।। ३ ।।

अपि प्रसन्नेन महर्षिणा त्वं सम्यग्विनीयानुमतो गृहाय ।
कालो ह्ययं सङ्क्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते ।। ४ ।।

तवार्हतो नाभिगमेन तृप्तं मनो नियोगक्रिययोत्सुकं मे ।
अप्याज्ञया शासितुरात्मना वा प्राप्तोऽसि सम्भावयितुं वनान्माम् ।। ५ ।।

इत्यर्घ्यपात्रानुमितव्ययस्य रघोरुदारामपि गां निशम्य ।
स्वार्थोपपत्तिं प्रति दुर्बलाशस्तमित्यवोचद्वरतन्तुशिष्यः ।। ६ ।।

*	सर्वत्र नो वार्तमवेहि राजन्नाथे कुतस्त्वय्यशुभं प्रजानाम् ।
सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा ।। ७ ।।

*	शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः ।
आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः ।। ८ ।।

*	स्थाने भवानेकनराधिपः सन्नकिञ्चनत्वं मखजं व्यनक्ति ।
पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः ।। ९ ।।

तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तुमहं यतिष्ये ।
स्वस्त्यस्तु ते निर्गलिताम्बुगर्भं शरद्घनं नार्दति चातकोऽपि ।। १० ।।

एतावदुक्त्वा प्रतियातुकामं शिष्यं महर्षेर्नृपतिर्निषिध्य ।
किं वस्तु विद्वन्गुरवे प्रदेयं त्वया कियद्वेति तमन्वयुङ्क्त ।। ११ ।।

ततो यथावद्विहिताध्वराय तस्मै स्मयावेशविवर्जिताय ।
वर्णाश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुतमाचचक्षे ।। १२ ।।

समाप्तविद्येन मया महर्षिर्विज्ञापितोऽभूद्गुरुदक्षिणायै ।
स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत्पुरस्तात् ।। १३ ।।

निर्बन्धसञ्जातरुषार्थकार्श्यमचिन्तयित्वा गुरुणाहमुक्तः ।
वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति ।। १४ ।।

सोऽहं सपर्याविधिभाजनेन मत्वा भवन्तं प्रभुशब्दशेषम् ।
अभ्युत्सहे सम्प्रति नोपरोद्धुमल्पेतरत्वाच्छ्रुतनिष्क्रयस्य ।। १५ ।।

इत्थं द्विजेन द्विजराजकान्तिरावेदितो वेदविदां वरेण ।
एनोनिवृत्तेन्द्रियवृत्तिरेनं जगाद भूयो जगदेकनाथः ।। १६ ।।

गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामम् ।
गतो वदान्यान्तरमित्ययं मे मा भूत्परीवादनवावतारः ।। १७ ।।



AP SCERT

स त्वं प्रशस्ते महिते मदीये वसंश्चतुर्थोऽग्निरिवाग्निगारे ।
द्वित्राण्यहान्यर्हसि सोढुमर्हन् यावद्यते साधयितुं त्वदर्थम् ॥ १८ ॥

तथेति तस्यावितथं प्रतीतः प्रत्यग्रहीत्संगरमग्रजन्मा ।
गामात्तसारां रघुरप्यवेक्ष्य निष्क्रष्टुमर्थं चकमे कुबेरात् ॥ १९ ॥

अथाधिशिश्ये प्रयतः प्रदोषे रथं रघुः कल्पितशस्त्रगर्भम् ।
सामन्तसम्भावनयैव धीरः कैलासनाथं तरसा जिगीषुः ॥ २० ॥

प्रातः प्रयाणाभिमुखाय तस्मै सविस्मयाः कोषगृहे नियुक्ताः ।
हिरण्मयीं कोषगृहस्य मध्ये वृष्टिं शशंसुः पतितां नभस्तः ॥ २१ ॥

स भूपतिर्भासुरहेमराशिं लब्धं कुबेरादभियास्यमानात् ।
दिदेश कौत्साय समस्तमेव पादं सुमेरोरिव वज्रभिन्नम् ॥ २२ ॥



जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतानभिनन्द्य सत्त्वौ ।
गुरुप्रदेयाधिकनिःस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ॥ २३ ॥

अथोष्ट्रवामीशतवाहितार्थं प्रजेश्वरं प्रीतमना महर्षिः ।
स्पृशन्करेणानतपूर्वकायं संप्रस्थितो वाचमुवाच कौत्सः ॥ २४ ॥

आशास्यमन्यत्पुनरुक्तभूते श्रेयांसि सर्वाण्यधिजग्मुषस्ते ।
पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव ॥ २५ ॥

## श्लोकानां भावाः

1. రఘుమహారాజు 'విశ్వజిత్' అనే యాగం చేసి ఆ యాగంలో తనకున్న సమస్తసంపదలను దానం చేశాడు. అటువంటి రఘుమహారాజు దగ్గరికి వరతంతు మహర్షికి శిష్యుడైన కౌత్సుడు గురుదక్షిణ ఇవ్వడానికి కావలసిన ధనాన్ని అడగడానికి వచ్చాడు.
2. గొప్ప వ్యక్తిత్వం కలవాడు, అతిథి మర్యాదలు చేయడం తెలిసినవాడు అయిన ఆ రఘుమహారాజు సంపదంతా దానం చేసి ఉండటం వలన మట్టిపాత్రలో అర్ఘ్యజలాన్ని ఉంచుకొని కౌత్సునికి స్వాగతం పలికాడు.
3. ఆత్మగౌరవం కలవాడు, శాస్త్రాలు తెలిసినవాడు, కార్యజ్ఞానం కలవాడు అయిన రఘుమహారాజు తపోధనుడైన కౌత్సుని ఉచితాసనంలో కూర్చోబెట్టి, అతిథిపూజ చేసి, నమస్కరించి, దగ్గర నిలబడి వినయంగా ఇలా పలికాడు.
4. మీ గురువుగారు ప్రసన్నహృదయం కలవాడై నీకు అన్ని విద్యలు చక్కగా నేర్పి, నీవు గృహస్థాశ్రమం తీసుకోవడానికి అనుమతి ఇచ్చారా? బ్రహ్మచర్య – గృహస్థ – వానప్రస్థ- సంన్యాసములనే ఆశ్రమాలలో ఉన్నవారందరికీ సేవలు చేయడానికి అనుకూలమైన గృహస్థాశ్రమాన్ని పొందడానికి నీకిది సరియైన సమయం.
5. ఓ కౌత్సా ! పూజ్యుడవైన నీ రాకమాత్రం చేత నా మనస్సు తృప్తిపడటం లేదు. అది నీవిచ్చే ఆజ్ఞను అనుసరించడం కోసం త్వరపడుతున్నది. నీవు మీ గురువుగారి ఆజ్ఞ ప్రకారం ఇక్కడికి వచ్చావా? లేక స్వయంగా అడవి నుండి నన్నాదరించుటకు ఇక్కడికి వచ్చావా? ఇక్కడికి వచ్చుటకు ఏమి కారణం?
6. రఘుమహారాజు చేతిలో ఉన్న మట్టి పాత్రను చూసి అతడు తన సంపదనంతా దానం చేశాడని తెలుసుకున్నాడు కౌత్సుడు. రఘుమహారాజు పలికిన ఔదార్య పూర్ణమైన మాటలను విన్నప్పటికీ తన ప్రయోజనం సఫలం కాదనే భావంతో ఇలా పలికాడు.
7. ఓ రాజా ! నీ రాజ్యపాలనలో ప్రజలందరూ క్షేమంగా ఉన్నారు. ప్రజలకు ఎటువంటి కష్టము లేదు. సూర్యుడు ప్రకాశిస్తుండగా చీకటి లోకం చూపును అడ్డుకోలేదు కదా !
8. ఓ రాజా ! నీవు నీ సంపదను పూర్తిగా సజ్జనులను దానం చేశావు. అటువంటి నీవు అడవిలో మునులు ధాన్యం తీసుకున్న తరువాత కేవలం కాండంతో మిగిలిపోయిన మొక్కవలె ప్రకాశిస్తున్నావు.
9. ఓ రాజా ! నీవు సార్వభౌముడవై యుండి యజ్ఞం చేసి, ఉన్న సంపదనంతా దానం చేసి, పేదరికాన్ని పొందటం యుక్తంగానే ఉంది. దేవతలు అమృతం తాగిన తరువాత అమృతకిరణాలు గల చంద్రుడు తరగిపోతాడు. అతని ఈ క్షయం వృద్ధి కంటే గొప్పది కదా !
10. అందువలన గురుకార్యం తప్ప మరొక పనిలేని నేను గురుదక్షిణ కోసం మరొకరి దగ్గరకు వెళ్ళి ప్రయత్నం చేస్తాను. నీకు శుభమగుగాక ! చాతకపక్షి కూడా వర్షించిన శరన్మేఘాన్ని యాచించదు కదా!
11. ఈ విధంగా పలికి తిరిగిపోవాలని ప్రయత్నిస్తున్న కౌత్సుని ఆపి, రఘుమహారాజు ఇలా అన్నాడు. "ఓ పండితుడా! మీ గురువుగారికి నీవు ఇవ్వాలనుకున్న వస్తువేంటి? అది ఎంత?" అని.



AP SCERT

12. శాస్త్రం ప్రకారం యజ్ఞం చేసిన రఘుమహారాజు గర్వం లేనివాడై సవినయంగా అడిగినపుడు కోరిక సఫలం కాకపోయినా సమాధానం చెప్పడం తన ధర్మం అనుకొని కౌత్సుడు ఇలా పలికాడు.

13. నేను గురువుగారి వద్ద అన్ని విద్యలు నేర్చుకొని గురుదక్షిణ తీసుకొమ్మని ఆయనను కోరాను. అప్పుడు వరతంతు మహర్షి నీవు చాలాకాలంగా చేసిన సేవలనే గురుదక్షిణగా తీసుకొని నేను సంతోషిస్తున్నాను" అని అన్నారు.

14. కానీ నేను బలవంతం చేయడం వల్ల కోపించిన మా గురువుగారు నీవు నా దగ్గర 14 విద్యలను నేర్చుకొన్నావు. కనుక విద్యకొక కోటి చొప్పున 14 కోట్ల బంగారు నాణాలు తెచ్చి ఇవ్వమని అన్నారు.

15. గురుదక్షిణ కోసం 14 కోట్ల బంగారు నాణాలు అడగడానికి వచ్చిన నేను, నన్ను పూజించడానికి ఎదురొచ్చిన నీ చేతిలోని మట్టిపాత్రను చూసి నీవు సర్వస్వం దానం చేసి పేరుకు మాత్రమే రాజుగా ఉన్నావని అర్థం చేసుకున్నాను. ఇటువంటి సమయంలో అత్యధిక ధనం ఇవ్వమని నిన్ను కోరడం సరికాదు. నేను వెళ్ళి వస్తాను.

16. ఈ విధంగా వేదవేత్త అయిన కౌత్సుడు చంద్రుని కాంతి వంటి కాంతి గలవాడు, పుణ్యాత్ముడు, లోకానికి రాజు అయిన రఘుమహారాజుతో పలికాడు.

17. అప్పుడు రఘువిట్లనెను. ఓ కౌత్సుడా ! సకలశాస్త్రపారంగతుడై గురుదక్షిణ కోసం వచ్చిన ఒక బ్రహ్మచారి యైన బ్రాహ్మణుడు రఘువు వద్ద తన కోరిక తీరక మరొక దాతను వెతుక్కుంటూ వెళ్ళాడనే కొత్త అపకీర్తి నాకు రాకూడదు.

18. ఓ కౌత్సుడా ! పండితుడవైన నీవు పవిత్రమైన నా అగ్నిశాలలో నాలుగవ అగ్ని వలె రెండు మూడు దినములు నివసించుము. నీ గురుదక్షిణను సంపాదించడానికి నేను తప్పక ప్రయత్నిస్తాను.

19. కౌత్సుడు రఘుమహారాజు యొక్క మాటను సంతోషంతో అంగీకరించాడు. ఆ రఘుమహారాజు కూడా భూమి నుండి ముందే ధనసంపాదన చేసియున్న వాడు కనుక ఇక ధనవంతుడైన కుబేరుని నుండే ధనం సంపాదించాలని అనుకున్నాడు.

20. ఆనాటి రాత్రి నియమనిష్ఠలుగలవాడైన, ధీరుడైన రఘుమహారాజు కైలాసనాథుడైన కుబేరుని ఓడించడానికి కావలసిన అస్త్రాలన్నింటిని రథంలో ఉంచి, తాను కూడా రథంలోనే నిద్రించాడు.

21. ఉదయాన్నే యుద్ధానికి వెళ్ళడానికి సిద్ధంగా ఉన్న రఘుమహారాజు వద్దకు ఆశ్చర్యచకితులైన కోశాధికారులు వచ్చి రాత్రి ఆకాశం నుండి కోశాగారంలో పడిన సువర్ణవృష్టిని గురించి తెలిపారు.

22. రఘుమహారాజు తాను దండెత్తి వస్తున్నట్లు తెలిసి కుబేరుడు కురిపించిన, మేరుపర్వతశిఖరం లాగా ఉన్న ఆ మొత్తం సువర్ణరాశిని కౌత్సునికి ఇచ్చాడు.

23. గురువుకు సమర్పించవలసినదానికంటే ఎక్కువ డబ్బును తీసుకోవడానికి కౌత్సుడు ఇష్టపడలేదు. అందుకు తనకు కావలసినంతమాత్రమే ఇవ్వమని కోరాడు. ఆ రఘుమహారాజు కౌత్సుని కోసం సంపాదించిన ఆ ధనాన్ని అడిగిన దానికంటే ఎక్కువగా ఉన్నప్పటికి అతనికే ఇవ్వాలనుకుంటున్నాడు. ఇలా యాచకుడు, దాత ఇద్దరునూ అయోధ్యానగరంలోని ప్రజలు మెచ్చుకునేలా ప్రవర్తించారు.

AP SCERT

24. ఎట్టకేలకు రఘుమహారాజు కౌత్సుని ఒప్పించి ధనాన్నంతా ఒంటెలమీద, గుర్రాలమీద వేయించాడు. వెళ్ళబోతున్న కౌత్సుని పాదాలకు రఘువు నమస్కరించాడు. కౌత్సుడు రఘువును తన చేతితో తాకుతూ ఇలా పలికాడు.

25. "ఓ రాజా ! రథగజతురగాది సమస్త సంపదలు గల నీకు ఏ ఆశీర్వాదం ఇచ్చినా అది పునరుక్తియే అవుతుంది. కనుక స్తుతియోగ్యుడవైన నిన్ను నీ తండ్రి కన్నట్లు నీవు కూడా నీ వంటి సద్గుణసంపన్నుడైన పుత్రుని పొందుము" అని కౌత్సుడు ఆశీర్వదించాడు.

## कविपरिचयः

कविकुलगुरुः कालिदासः संस्कृतकविषु अग्रगण्यः । कालिदासः रघुवंशम्, कुमारसम्भवम्, मेघसन्देशः इति त्रीणि श्रव्यकाव्यानि, विक्रमोर्वशीयम्, मालविकाग्निमित्रम्, अभिज्ञानशाकुन्तलमिति त्रीणि दृश्यकाव्यानि, ऋतुसंहारः इति खण्डकाव्यं रचितवान् । अस्य कालः ई.पू. प्रथमशताब्दिः इति विमर्शकाः वदन्ति । उपमालङ्कारप्रयोगे कालिदासः अद्वितीयः। अत एव 'उपमा कालिदासस्य' इत्युक्तिः प्रसिद्धा । कालिदासस्य कवित्वम् अतिमधुरं मनोहरं च । पाठ्यभागोऽयं रघुवंशमहाकाव्यस्य पञ्चमसर्गात् सङ्गृहीतः ।

## विशेषांशाः

**विश्वजिद्यागः** - తన దగ్గర ఉన్న సంపదనంతా త్యాగం చేస్తూ లోకకళ్యాణం కొరకు చేసే యాగమే విశ్వజిత్‌యాగం.

**चातकः** - 'చాతకం' అనేది ఒక పక్షిపేరు. ఈ చాతకపక్షి మేఘం నుండి వర్షపు నీరు పడుతున్నప్పుడు ఆ నీటిని మధ్యలోనే పట్టుకొని తాగుతుంది. నేలపై పడిన నీటిని తాగదు.

**चतुर्दशविद्याः** - విద్యలు పదునాలుగు. అవి 1. ఋగ్వేదము, 2. యజుర్వేదము, 3. సామవేదము, 4. అథర్వణవేదము, 5. శిక్షా, 6. వ్యాకరణము, 7. ఛందస్సు, 8. నిరుక్తము, 9. జ్యోతిషము, 10. కల్పము, 11. మీమాంస, 12. న్యాయశాస్త్రము, 13. పురాణము, 14. ధర్మశాస్త్రము.

**त्रयः अग्नयः** - 1. గార్హపత్యాగ్ని 2. ఆహవనీయాగ్ని 3. దక్షిణాగ్ని

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. पाठस्य अन्यां शीर्षिकां हेतुबद्धतया सूचयन्तु ।

२. कौत्सः गुरुवचनानुसारं गुरुदक्षिणायै धनसम्पादनं कृतवान् । भवन्तः गुरुवचनपालनं कथं कुर्वन्ति ?

३. भवद्भ्यः रोचकानां पाठगतानां त्रयाणां श्लोकानां भावं वदन्तु ।


AP SCERT

आ) अधः दत्तानि पदानि पाठे कस्मिन् श्लोके सन्तीति ज्ञात्वा कुण्डल्यां श्लोकसंख्यां लिखन्तु । तेषाम् अर्थान् जानन्तु ।

| | | | | | |
|---|---|---|---|---|---|
| १. | विश्वजिति | (  ) | ७. | कल्पितशस्त्रगर्भम् | (  ) |
| २. | वीतहिरण्मयत्वात् | (  ) | ८. | अभियास्यमानात् | (  ) |
| ३. | सङ्क्रमितुम् | (  ) | ९. | हिरण्मयीम् | (  ) |
| ४. | शरीरमात्रेण | (  ) | १०. | अर्थिकामादधिकप्रदः | (  ) |
| ५. | विद्यापरिसंख्यया | (  ) | ११. | आनतपूर्वकामम् | (  ) |
| ६. | चतुर्थोऽग्निः | (  ) | १२. | आत्मगुणानुरूपम् | (  ) |

इ) अधः दत्तानां वाक्यानां ससन्दर्भं भावं लिखन्तु ।

१. प्रत्युज्जगामातिथिमातिथेयः ।
२. कालो ह्ययं सङ्क्रमितुं द्वितीयम् ।
३. स्तम्बेन नीवार इवावशिष्टः ।
४. कोटीश्चतस्रो दश चाहरेति ।
५. शरद्घनं नार्दति चातकोऽपि ।
६. वृष्टिं शशंसुः पतितां नभस्तः ।

ई) श्लोकं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

**हस्तस्य भूषणं दानं**
**सत्यं कण्ठस्य भूषणम् ।**
**श्रोत्रस्य भूषणं शास्त्रं**
**भूषणैः किं प्रयोजनम् ॥**

१. हस्तस्य भूषणं किम् ?
२. सत्यं कस्य भूषणम् ?
३. श्रोत्रस्य भूषणं किम् ?
४. कैः भूषणैः किं प्रयोजनम् ?

उ) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. कालिदासः कानि काव्यानि रचितवान् ?
२. कौत्सः किमर्थं रघोः समीपमागतवान् ?
३. सुवर्णनाणकानि दातुं रघुः अशक्तः इति कौत्सः किमर्थं चिन्तितवान् ?
४. कौत्साय सुवर्णनाणकानि दातुं 'रघुः' किं कृतवान् ?
५. पाठ्यभागोऽयं कस्मात् ग्रन्थात् गृहीतः ?



AP SCERT

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ?

१. 'नाम्ना एव भवान् राजा' इति कौत्सः रघुमहाराजं किमर्थम् अवदत् ?

२. गुरुदक्षिणायाः दाने स्वीकरणे च कारणं किम् ?

३. केषु सन्दर्भेषु ''क्षयः श्लाघ्यतरोः हि वृद्धेः'' इति विवृण्वन्तु ?

### आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण (दशवाक्यैः) लिखन्तु ।

१. पाठ्यांशाधारेण 'रघोः वदान्यता' विषये लिखन्तु ।

२. रघुमहाराजस्य स्थाने यदि भवन्तः भवन्ति तर्हि किं करिष्यन्ति ?

### इ) सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।

१. पाठ्यांशस्य आधारेण रघुकौत्सयोः सम्भाषणं रचयन्तु ।

२. अधः दत्तम् अनुच्छेदं संस्कृभाषया अनुवदन्तु ।

ఎందరో మహనీయుల త్యాగఫలం స్వతంత్రభారతదేశం. అలాంటి దేశాన్ని కాపాడుకోవడం కోసం మనం అహర్నిశలు ప్రయత్నం చేయాలి. దేశాన్ని పట్టి పీడిస్తున్న రకరకాల సమస్యలను మనం ధైర్యంతో ఎదుర్కోవాలి. మనం పూర్వీకులు ఇచ్చిన దేశ సంపదను ద్విగుణీకృతం చేసి ముందు తరాల వారికి సుసంపన్న మైన భారతాన్ని అందివ్వాలి.

## III. भाषांशाः

### 1. पदजालाभिवृद्धिः

### अ) अधः दत्तेषु वाक्येषु रेखाङ्कितपदानां समानार्थकपदानि ज्ञात्वा लिखन्तु ।

१. इन्द्रः <u>याचकः</u> भूत्वा कर्णं कवचकुण्डलानि याचते ।
<u>दानी</u> कर्णः तस्मै कवचकुण्डलानि ददाति ।

२. ''वयम् अर्थिनः । भवान् कन्यायाः दाता'' इति मुनयः हिमवन्तम् अवदन् ।

३. कौत्सः उत्तमः प्रतिग्रहीता । रघुमहाराजः उत्तमः वदान्यः ।

याचकः - ------------------ ------------------

दानी - ------------------ ------------------

### आ) रेखाङ्कितपदानां विरुद्धार्थकपदानि पाठात् चित्वा तान्युपयुज्य स्वीयवाक्यानि लिखन्तु ।

१. शिष्यः गुरोः <u>अनुयायी</u> भवति ।

२. यदि सूर्यः नास्ति तर्हि <u>अन्धकारः</u> एव भवति ।

३. संस्कृतभाषया संस्कृतेः <u>वृद्धिः</u> भवति ।



AP SCERT

### इ) पाठस्य आधारेण चक्रगतानि समानार्थकपदानि ज्ञात्वा लिखन्तु ।




## २. व्याकरणांशाः

### अ) अधः दत्तानां पदानां सन्धिविच्छेदनं कृत्वा सन्धिनामानि लिखन्तु ।

१. सर्वोपकारक्षमम्
२. निर्गलिताम्बुगर्भम्
३. क्षीतीशम्
४. अभ्युत्सहे
५. महर्षिः

### आ) अधः दत्तानां पदानां योजनं कृत्वा सन्धिनामानि लिखन्तु ।

१. स्वार्थ + उपपत्तिम्
२. इति + उवाच
३. गुरुदक्षिणा + अर्थी
४. सम्यक् + विनीयानुमतः
५. इव + अवशिष्टः

### * अधः दत्तानि सन्धिपदानि परिशीलयन्तु । विवरणम् अवगच्छन्तु ।

बालाः + अत्र = बाला अत्र (आः + अ = विसर्गलोपः)
लताः + एधन्ते = लता एधन्ते (आः + ए = विसर्गलोपः)
छात्राः + गच्छन्ति = छात्रा गच्छन्ति (आः + ग् = विसर्गलोपः)
वृद्धाः + यान्ति = वृद्धा यान्ति (आः + य् = विसर्गलोपः)

**आकारात् परस्य विसर्गस्य अशि (स्वराः, वर्गीयतृतीय-चतुर्थ-पञ्चमवर्णाः य, र, ल व ह) परे विसर्गस्य लोपो भवति ।**

**आः + अश् = विसर्गलोपः**

* **अधः दत्तानि सन्धिपदानि परिशीलयन्तु । विवरणम् अवगच्छन्तु ।**

छात्रः + एति = छात्र एति (अः + ए = विसर्गलोपः)

अश्वः + आगच्छति = अश्व आगच्छति (अः + आ = विसर्गलोपः)

**अकारात् परस्य विसर्गस्य अकारं वर्जयित्वा स्वरे परे विसर्गस्य लोपो भवति ।**

**अः + अकारं विना स्वराः = विसर्गलोपः**

* **अधः दत्तानि सन्धिपदानि परिशीलयन्तु । विवरणम् अवगच्छन्तु ।**

एषः + गच्छति = एष गच्छति (एषः + ग = विसर्गलोपः)

सः + तत्र = स तत्र (सः + त = विसर्गलोपः)

एषः + वदति = एष वदति (एषः + व = विसर्गलोपः)

सः + पठति = स पठति (सः + प = विसर्गलोपः)

**एषः, सः इत्यनयोः पदयोः व्यञ्जनेषु परेषु विसर्गस्य लोपः भवति ।**

एषः / सः + व्यञ्जनानि = विसर्गलोपः

**उपरि दर्शिताः विसर्गसन्धेः केचन प्रभेदाः ।**

**इ) सन्धिं कुर्वन्तु ।**

१. देवाः + आगच्छन्ति
२. वृद्धाः + यान्ति
३. कुतः + आयाति
४. सः + खादति
५. एषः + आनयति

**ई) सन्धिविच्छेदं कुर्वन्तु ।**

१. बाला धावन्ति
२. क इदानीम्
३. स मृन्मये
४. नीवार इव
५. स वर्णी

**उ) अधः दत्तानां 'नञ्' तत्पुरुषसमासपदानां विग्रहवाक्यानि लिखन्तु ।**

१. अशुभम्
२. अकिञ्चन
३. अचिन्तयित्वा
४. अनर्घशीलः
५. अनन्यकार्यम्

**ऊ) पाठात् 'ल्यप्' प्रत्ययान्तपदानि चित्वा लिखन्तु ।**

**परियोजनाकार्यम्**

१. प्रसिद्धानां गुरुशिष्याणां चित्राणि संगृह्य कक्ष्यायां प्रदर्शयन्तु ।
२. कालिदासस्य काव्यानि तेषाम् इतिवृत्तं च सङ्क्षेपेण विलिख्य कक्ष्यायां प्रदर्शयन्तु ।



AP SCERT

# ३. स्वावलम्बनम्

Z5X4G1

## पठन्तु, विचिन्त्य वदन्तु

**उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः ।**
**न हि सुप्तस्य सिंहस्य प्रविशन्ति मृखे मृगाः ॥**

## प्रश्नाः ?

१. अस्मिन् सुभाषिते किं वर्णितमस्ति ?
२. कार्याणि केन सिध्यन्ति ?
३. सुप्तस्य सिंहस्य मृखे मृगाः प्रविशन्ति वा ? किमर्थम् ?

## उद्देश्यम्

* स्वशक्त्या स्वतन्त्रजीवननिभालनसामर्थ्यसम्पादनम् ।
* पराधीनजीवनं निन्द्यमिति अवबोधनम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।



AP SCERT

कश्चिद्व्यापारी निजपुत्राय किञ्चिद्धनं दत्त्वा व्यापाराय वस्तुसङ्ग्रहं कर्तुं विदेशं प्रेषयामास । गमनसमये स निजसुतमाश्वासयाञ्चकार 'वत्स ! ईश्वरे कार्यस्त्वया दृढविश्वासः । स एव सर्वेभ्यः फलदाताऽस्ति । निजशक्तेरनुसारमुद्यमोऽस्माकं कर्तव्यः ।

पूर्वकाले वर्तमानकालवत् बाष्पयानप्रभृतीनि नासन् वाहनानि । न च वार्ताप्रेषणस्येव तारयन्त्रादि-वस्तुविधा अभूत् । पादाभ्यामेव मार्गोल्लङ्घनं पुरा कर्तव्यमभूत् । अत एव स वणिक्पुत्रः पादचर एव गन्तव्यदेशं प्रति प्रातिष्ठत । एकदा मार्गे गच्छत एव तस्य रात्रिः उपतस्थौ । समीपे न अदृश्यत कश्चिद् ग्रामोऽपि । अत एव घोरे वने एव स्थातुं स विवशः अभवत् । भयात्स निशि निद्रामपि न लेभे । सुरक्षितं वृक्षकोटरम् अध्यतिष्ठत । तदा तेन दृष्टं यदेकः शृगालः समीप एव पतितोऽस्ति । रोगात्स तावदशक्तो यद् गन्तुमपि न तस्य सामर्थ्यम् । तं दृष्ट्वा तेन विचारितम् 'अहो अयमत्यन्तं रुग्णोऽस्ति । नायं पदात्पदमपि गन्तुं समर्थः । हन्त ! कथमयं वराकः निजोदरं पूरयेत् ? एवमेव गच्छति काले काऽस्य जीवनस्य आशा?'

एवं विचारमग्न एव स मार्गश्रमात् निद्राम् उपगतवान् । किन्तु किञ्चित्कालानन्तरमेव घोरात् सिंहगर्जनात् स जागरितः अभवत् । भयाकुलः स कोटरे निभृतं व्यलीयत । एतस्मिन् अन्तराले स सिंहः कश्चिद्वन्यपुशुं हत्वा तन्मांसं बुभुजे । अवशिष्टमंशं तत्रैव त्यक्त्वा यथागतं वनान्तरम् आगच्छत् । सिंहे दूरं गते स वणिग्बालकः कोटरद्वारात् अपश्यत् - यस्मिन्स्थाने स शृगालः पतितोऽभूत् तत्समीप एव सिंहेन



स वन्यपशुः व्यापादितः । सिंहगमनानन्तरं मांसगन्धं प्राप्य रुग्णः स जम्बुकः शनैः शनैः तत्रागत्य तन्मांसेन निजोदरं पूरयामास, तत्रैव च सुखेन सुष्वाप ।

व्यापारिबालकः तदेतद् दृष्ट्वा सुविस्मितः अभवत् । स मनसि व्यचिन्तयत् - 'अहो ईश्वरः प्रत्येकदशायाम् उदरपूरणाय यदा भोजनं ददाति तदा किमिति परिश्रमेण अस्माभिः आत्मा पीडयितव्यः?' विचार्यैव तदिदं स पराववृते गृहम् । निजभवनम् उपेत्य सर्वमिमं वृत्तान्तं निजपित्रे निवेदयामास, प्रोवाच च 'सर्वदैव यदा भगवान् अस्माकम् उदरपूर्तिं करोति तदा विफलेन अस्माकम् उद्यमेन किम् ? विदेशेषु वस्तुक्रयणस्य विक्रयणस्य च परिश्रमं किमिति मुधा कुर्याम ?'

एतदाकर्ण्य पिता तूष्णीम् अतिष्ठत्, किन्तु क्षणानन्तरमेव पुत्रम् अशिक्षयत् - 'वत्स ! यत् त्वया प्रोक्तं तदेतत्सर्वं सत्यम् । किन्तु जाने त्वं बुद्धिमान् असि । वद त्वमेव, किं त्वं रुग्णशृगालवत् निजजीवनमन्येषाम् उच्छिष्टेन निर्वाहयितुं वाञ्छसि, आहोस्वित् सिंहवत् ? अहं तु वाञ्छामि यत् त्वं सिंहवत् स्वावलम्बनः भवेः । अत एवायम् उपदेशो मम यत् त्वं शार्दूलवत् स्वयमेव निजभोजनम् उपार्जयेः, अन्येभ्यश्च तदवशेषं प्रयच्छ । येन तव सर्वत्र प्रभावो व्याप्नुयात्' ।

पितुरिमां शिक्षामाकर्ण्य विचारशीलः स व्यवसायिबालको मनसि भृशं ललज्जे । नैतदनन्तरं स विचारम् एवम्विधं चकार । व्यवसायव्यापृतः स महद्धनं प्रभूतं च यशः प्राप्त् ।

* **सिंहवत्स्वयमुद्योगी परेषामाश्रयो भवेत् ।**
**परोच्छिष्टोपजीवी तु गर्ह्यो रुग्णशृगालवत् ॥**

**कविपरिचयः**

अस्याः सामाजिककथायाः प्रणेता वर्तते भट्टश्री मञ्जुनाथशास्त्री । अयं च कविः राजस्थाननिवासी आसीत् । प्रस्तुतपाठ्यांशः अस्य कवेः सामाजिककथाभ्यः स्वीकृतः । अस्य गद्यरचनायां सामाजिकपरिवेशादिचित्रणवैशिष्ट्यं द्रष्टुं शक्यते।

जयपुरवैभवं, गोविन्दवैभवं, साहित्यवैभवञ्चेति अनेन दशाधिकग्रन्थाः विरचिताः ।

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. स्वावलम्बनम् इति पदस्य श्रवणेन भवन्तः किं भावयन्ति ?

२. 'सिंहवत् स्वयमुद्योगी' इति भावाधारेण सिंहः कथं जीवतीति भवन्मित्रैः चर्चयन्तु ।

३. रुग्णशृगालवत् भवामश्चेत् जीवनं कथं भवतीति विचिन्त्य वदन्तु ।

४. अस्य पाठ्यांशस्य सन्देशं वदन्तु ।

**आ) अधः दत्तानि वाक्यानि पाठे अन्विष्य अनुच्छेदसङ्ख्यां सूचयन्तु ।**

१. पादाभ्यामेव मार्गोल्लङ्घनं पुरा कर्तव्यमभूत् । ( )

२. अहं तु वाञ्छामि यत्त्वं सिंहवत् स्वावलम्बनः भवेः । ( )

३. 'सर्वदैव यदा भगवान् अस्माकम् उदरपूर्तिं करोति तदा विफलेन अस्माकमुद्यमेन किम् ? ( )

४. ईश्वरे विश्वासः त्वया कार्यः । ( )

५. भयाकुलः सः कोटरे निभृतं व्यलीयत । ( )

**इ) अधः दत्तं गद्यांशं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।**

कोण्डपल्लीति ग्रामे रामः सन्तोषश्च अत्यन्तस्नेहभावेन आबाल्यात् जीवनं यापयतः स्म । तयोः रामः धनवान्, सन्तोषश्च सामान्यकृषिकः । एकदा कालवशेन तस्मिन् ग्रामे तत्परिसरेषु च दुर्भिक्षं जातम् । सन्तोषः तत्परिवारजनाश्च अनेकाः बाधाः प्राप्तवन्तः । स्वमित्रस्य दीनामवस्थां दृष्ट्वा विचलितः रामः तस्मै धनसाहाय्यादिकं कृत्वा मित्रं तोषितवान् । पुनः तम् उत्साहपूर्णं कृतवान् । अत एवोच्यते मित्रं सजीवरत्नम् ।

१. कोण्डपल्लीति ग्रामे कौ कथं निवसतः स्म ?

२. रामसन्तोषयोः निर्धनः कः ? धनिकः कः ?

३. रामः मित्रस्य साहाय्यं किमर्थम् कृतवान् ?

४. अनुच्छेदानुसारं सन्मित्रस्य लक्षणं किम् ?

५. एतस्य गद्यांशस्य समुचितां शीर्षिकां सूचयन्तु ।

AP SCERT

### ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. व्यापारी किं बोधयित्वा स्वपुत्रं विदेशं प्रेषितनान् ?

२. विदेशप्रयाणसमये रात्रिवेलायां वणिक्पुत्रः कुत्र स्थितवान् ? तेन तत्र अवलोकितं किमिति लिखन्तु ।

३. निद्रामग्नः वणिक्पुत्रः केन कारणेन जागृतः ? तदनन्तरं तेन कीदृशी घटना दृष्टा ?

४. वणिक्पुत्रः जम्बुकस्य निजोदरपूरणं दृष्ट्वा मनसि किं चिन्तितवान् ?

५. वणिक् (पिता) स्वपुत्राय किं शिक्षितवान् ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. 'परोच्छिष्टोपजीवी तु गर्ह्यः' इति विषयमधिकृत्य भवताम् अभिप्रायं लिखन्तु ।

२. अरण्ये वणिक्पुत्रः स्वानुभूतं वृत्तान्तं पित्रे निवेदितवान् खलु ! तस्य स्थाने भवान् भवति चेत् किं निवेदयतीति लिखतु ।

३. भवान् सिंहशृगालयोर्मध्ये कः इव जीवितुम् इच्छति ?

### आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. वणिक्पुत्रः स्वजीवनम् इत्थं स्यादिति ज्ञानं कथं प्राप्नोदिति स्वीयवाक्यैः लिखन्तु ।

२. इदानीन्तनसामाजिकपरिस्थितीनाम् अनुगुणं स्वावलम्बनं कथं स्यादिति विषये स्वीयाभिप्रायं लिखन्तु ।

### इ) सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।

१. वर्तमानसाङ्केतिकयुगेऽपि केचन जनाः किमपि कार्यमकुर्वाणाः व्यर्थरूपेण इतरश्रमाधारितजीवनं यापयन्ति । तानुद्दिश्य निबन्धमेकं लिखन्तु ।

२. भवतः विद्यालयस्य कश्चन विद्यार्थी स्वकार्याणि सर्वाणि स्वयं करोति । भाविकाले तस्य जीवनं कथं भवति इति अभिनन्दन् दशवाक्यानि लिखतु ।

३. अधः दत्तमनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

తన కాళ్ళపై తాను నిలబడి జీవించడానికి విద్య ఎంతో అవసరం. విద్య ద్వారా సమాజంలో గౌరవంగా జీవించడం నేర్చుకుంటాడు. మంచేది, చెడేది అనే విచక్షణా జ్ఞానాన్ని పెంచుకుంటాడు. ఆ జ్ఞానంతో మానవుడు ఇతరులపై ఆధారపడకుండా ధర్మమార్గంలో నడుస్తూ, తన జీవితాన్ని ఇతరులకు ఆదర్శమైనదిగా అందిస్తాడు. ఇదే ఉత్తమజీవనవిధానం.



AP SCERT

## III. भाषांशाः

### 1. पदजालाभिवृद्धिः

**अ) अधः दत्तानां रेखाङ्कितपदानां पर्यायपदानि लिखन्तु ।**

उदा :- धान्यादीनां सञ्चयं कृत्वा व्यापारी बहु धनम् अर्जयति ।

व्यापारी = व्यावसायिकः, वणिक्

१. वन्यप्राणिषु जम्बुकः वञ्चकः इति प्रसिद्धः।
२. पराशरमहर्षेः तनयः वेदव्यासः ।
३. निशि आकाशे नक्षत्राणि, चन्द्रः ग्रहाः अत्यन्तं प्रकाशन्ते ।
४. उद्यमेनैव सर्वाणि कार्याणि सिद्ध्यन्ति ।
५. सिंहः इव सर्वोऽपि धैर्येण जीवनं कुर्यात् ।

**आ) अधः दत्तायां पट्टिकायां कानिचन क्रियापदानि, तेषाम् अर्थाश्च वर्तन्ते । तानभिज्ञाय क्रमेण सूचयन्तु ।**

| | | | | |
|---|---|---|---|---|
| प्रयच्छ | सुप्तवान् | प्रोवाच | सम्पादयेः | लज्जितवान् |
| बुभुजे | चकार | प्रापत् | प्रार्थितवान् | काङ्क्षति |
| प्रस्थितवान् | निवेदयामास | * | प्रातिष्ठत | अपश्यत् |
| उपार्जयेः | लब्धवान् | ललज्जे | दृष्टवान् | अखादत् |
| वाञ्छति | उक्तवान् | कृतवान् | देहि | सुष्वाप |

**इ) अधः दत्तानि क्रियापदानि उपयुज्य स्वीयवाक्यानि लिखन्तु ।**

१. प्रयच्छ २. ललज्जे ३. चकार ४. प्रापत्
५. प्रातिष्ठत ६. प्रेषयामास

### 2. व्याकरणांशाः

**अ) 'क्त्वा' प्रत्ययान्तपदम् उपयुज्य वाक्यसंयोजनं कुर्वन्तु ।**

१. वणिक् विदेशं गच्छति । व्यापारं करोति ।
२. बालकः खादति । पाठशालां गच्छति ।
३. माता विद्यालयं गच्छति । बालकं आनयति ।
४. रविः विषयं स्मरति । कवितां लिखति ।
५. शिवः भगवद्गीतां क्रीणाति । पठति ।

**आ) अधः दत्तानां पदानां सन्धिविच्छेदं कृत्वा सन्धिनामानि लिखन्तु ।**

१. निजोदरं २. वार्ताप्रेषणस्येव ३. भयाकुलः
४. नासन् ५. स्वावलम्बनम्

AP SCERT

इ) अधः दत्तानि पदानि संयोज्य सन्धिनामानि लिखन्तु ।

१. न + अयं
२. का + अस्य
३. न + एतत्
४. पर + उच्छिष्टोपजीवी
५. क्षण + अनन्तरं
६. एतत् + आकर्ण्य

* अधः दत्तानि सन्धिपदानि पठन्तु । विवरणम् अवगच्छन्तु ।

१. बालकः + गच्छति = बालक + उ + गच्छति - बालको गच्छति (ः = उ)
२. रामः + हसति = राम + उ + हसति - रामो हसति (ः = उ)
३. नागः + धावति = नाग + उ + धावति - नागो धावति (ः = उ)
४. युवकः + याति = युवक + उ + याति - युवको याति (ः = उ)

अकारात्परस्य विसर्गस्य अकारे परे वर्गीयतृतीय-चतुर्थ-पञ्चमवर्णेषु य,र,ल,व,ह इत्येतेषु वर्णेषु च परेषु उकारः भवति । उकारे कृते गुणसन्धिरवश्यं करणीयः।

**अ + ः + अ / हशि = उकारः**

**अयं च कश्चन विसर्गसन्धेः भेदः ।**

ई) अधः दत्तानां पदानां सन्धिं कुर्वन्तु ।

१. उपदेशः + मम
२. शिवः + वन्द्यः
३. शुनकः + गच्छति
४. शिवकुमारः + नयति

उ) अधः दत्तानां पदानां सन्धिविच्छेदं कुर्वन्तु ।

१. भोजो वर्षति
२. बालो विहरति
३. नमो नमः
४. व्याघ्रो गर्जति

**परियोजनाकार्यम्**

"श्रम एव जयति, उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः", एतादृशानि स्वावलम्बनजीवनसम्बद्धानि घोषणवाक्यानि विलिख्य प्रदर्शयन्तु ।

**निम्नमनुसरति सलिलं विधिलिखितं बुद्धिरनुसरति ।**



आन्ध्रप्रदेशप्रभुत्वस्य निश्शुल्कवितरणम्

AP SCERT

# ४. वयं शिक्षेम तिर्यग्भ्यः

I5T6F5

## पठन्तु, विचिन्त्य वदन्तु

**(उमेशः गृहं प्रविश्य वृथारूपेण नालिकायाः जलस्रावः, प्रकोष्ठेषु विद्युतः च प्रकाशनं दृष्ट्वा अम्बां वदति)**

उमेशः - अम्ब ! अम्ब ! भवती कुत्र अस्ति ?
अम्बा - किमपेक्षितम् ? किम् अभवत् ?
उमेशः - पश्यतु नालिकायाः जलं वृथा गच्छति । कोऽपि अस्याः पिधानमेव नाकरोत् ।
अम्बा - अहं पात्राणि प्रक्षाल्य तथैव अगच्छम् । विस्मृतवती ।
उमेशः - न केवलं तावत्, पश्यतु प्रकोष्ठेषु दीपानां प्रकाशनं वृथा रूपेण ।
अम्बा - अहं तद् नापश्यं यतः अहं कार्यमग्ना अस्मि ।
उमेशः - पश्यतु अम्ब ! जलं, विद्युत् इत्यादिसर्वमपि अतिकष्टेन अस्माभिः लभ्यते । अतः एतेषां व्यर्थता न भवेदेव । (पितामहः एतत् सर्वं दृष्ट्वा)
पितामहः - बहूत्तमं पौत्र ! साधूक्तं भवता तव वचनम् अवश्यं ग्राह्यम् । पण्डितैः उच्यते एव खलु !
**"युक्तियुक्तम् उपादेयं वचनं बालकादपि ।**
**विदुषा तु सदा ग्राह्यं वृद्धादपि न दुर्वचः ।।"**
न केवलं जनेभ्यः, अस्मान् परितः विद्यमानेभ्यः जन्तुभ्योऽपि बहु ज्ञातव्यं भवति । यथा चाणक्यनीतौ उक्तम् .........
उमेशः - तत्कथम् ?
पितामहः - वदामि ।

## प्रश्नाः ?

१. उमेशः गृहे किं दृष्टवान् ?
२. उमेशस्य वचनेभ्यः भवान् / भवती किमवगच्छति ?
३. पितामहः बालकं किमर्थं प्रशंसितवान् ?

## उद्देश्यम्

* स्वीयव्यक्तित्वविकासे उपादेयानां मूल्यानामवबोधनम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

AP SCERT





* सिंहादेकं बकादेकं षट् शुनस्त्रीणि गर्दभात् ।
वायसात् पञ्च शिक्षेत चत्वारि कुक्कुटादपि ॥१॥

* प्रभूतमल्पकार्यं वा यो नरः कर्तुमिच्छति ।
सर्वारम्भेण तत्कुर्यात् सिंहादेकं प्रकीर्तितम् ॥२॥



* सर्वेन्द्रियाणि संयम्य बकवत् पण्डितो जनः ।
कालदेशोपपन्नानि सर्वकार्याणि साधयेत् ॥३॥



* बह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः ।
प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् शुनो गुणाः ॥४॥

* अविश्रामं वहेद्भारं शीतोष्णं च न विन्दति ।
ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्दभात् ॥५॥



* सूक्ष्मदर्शनधार्ष्ट्यं च काले चाहारसङ्ग्रहम् ।
अप्रमादमनालस्यं पञ्च शिक्षेत वायसात् ॥६॥



* युद्धं च प्रातरुत्थानं भोजनं सह बन्धुभिः ।
स्त्रियमापद्गतां रक्षेत् चत्वार्येतानि कुक्कुटात् ॥७॥



AP SCERT

భావాః –

మానవులు ప్రకృతిలో జీవిస్తున్న ప్రాణులనుండి కూడా ఎన్నో విషయాలను నేర్చుకోవాలని చాణక్యుడు ఈ శ్లోకాలలో తెలిపాడు.

1. సింహం నుండి ఒక లక్షణం, కొంగను చూసి ఒక లక్షణం, కుక్కను చూసి ఆరు లక్షణాలు, గాడిదను చూసి మూడు లక్షణాలు, కాకిని చూసి ఐదు లక్షణాలు, కోడిని చూసి నాలుగు లక్షణాలు, మానవులు నేర్చుకోవాలి.
2. మానవుడు ఏదైనా చిన్నపని కాని, పెద్దపని కాని చెయ్యాలనుకున్నప్పుడు తన సామర్థ్యాన్ని పూర్తిగా ఉపయోగించి ఆ పనిని మొదలుపెట్టాలి. ఈ లక్షణం సింహం నుండి నేర్చుకోవాలి.
3. పండితుడైన మానవుడు ఇంద్రియాలను అదుపులో ఉంచుకొని సరైన సమయంలో, సరియైన ప్రదేశంలో కార్యసాధన కోసం ప్రయత్నం చెయ్యాలి. ఈ లక్షణం కొంగ నుండి నేర్చుకోవాలి.
4. కుక్క ఎక్కువగా తింటుంది. అల్పసంతోషి, బాగా నిద్రపోతుంది. సులభంగా నిద్రలేస్తుంది, యజమానిపై విశ్వాసంతో ఉంటుంది. శత్రువుల విషయంలో పరాక్రమం చూపిస్తుంది. ఈ ఆరు లక్షణాలను కుక్కను చూసి మనం నేర్చుకోవాలి.
5. గాడిద విశ్రాంతి లేకుండా బరువులు మోస్తుంది. చలిని, వేడిని లెక్కించదు. ఎప్పుడూ సంతోషంగా ఉంటుంది. ఈ మూడు విషయాలను గాడిద నుండి నేర్చుకోవాలి.
6. నిశితంగా పరిశీలించడం, గొడవపడడం, సరైన సమయంలో ఆహారాన్ని సంగ్రహించడం, ప్రమాదం లేకుండా జాగ్రత్తపడడం, సోమరితనం లేకపోవడం అనే ఐదు లక్షణాలను కాకి నుండి మనం నేర్చుకోవాలి.
7. యుద్ధం చెయ్యడం, వేకువ సమయంలో నిద్ర లేవడం, బంధువులతో కలిసి భోజనం చెయ్యడం, స్త్రీలు ఆపదలో ఉన్నప్పుడు రక్షించడం అనే నాలుగు లక్షణాలను కోడిని చూసి మనం నేర్చుకోవాలి.

## कविपरिचयः

पाठ्यभागोऽयं चाणक्यविरचितस्य 'चाणक्यनीतिः' इत्यस्मात् ग्रन्थात् स्वीकृतः ।

''भोगलालसया प्रजापालनविमुखस्य नन्दवंशस्य निर्मूलनं यावत् न भवेत् तावत् मम शिखामिमां न बध्नामि'' इति विष्णुगुप्तस्य प्रतिज्ञां प्रायः न कोऽपि भारतीयः विस्मरति । एषः एव विष्णुगुप्तः आचार्यचणकस्य पुत्रः इति कृत्वा 'चाणक्य' इति नाम्ना ख्यातः ।

यद्यपि चाणक्यस्य जन्मस्थानविषये स्पष्टोल्लेखः नास्ति, तथापि तस्य शिक्षा तक्षशिलाविश्व-विद्यालये सम्पन्नेति इतिहासेन ज्ञायते । क्रै.पू. ३२५ इत्ययं चन्द्रगुप्तमौर्यस्य कालः । चाणक्यः चन्द्रगुप्तस्य महामन्त्री, गुरुः, हितैषी, राज्यसंस्थापकश्च ।अतः द्वयोः कालः समानः एव ।

स एष चाणक्यः कौटिल्यः इति नाम्ना अपि प्रसिद्धिमवाप । भारतीयेभ्यः राजनीतिबोधनाय अयम् अर्थशास्त्रं, चाणक्यनीतिः, चाणक्यनीतिसूत्राणि इत्यादीनां ग्रन्थानां रचनां चकार ।

चाणक्येन प्रतिपादितेषु ग्रन्थेषु राज्यव्यवस्थायां जनस्य प्राधान्यमत्यन्तं कल्पितमस्ति । जनः स्वनैतिकचरित्रनिर्माणेन समाजस्य पुनर्निर्माणदक्षतां प्राप्नोति । अतः आधुनिकशिक्षायां चाणक्यस्य नीतिग्रन्थानां पठनमनिवार्यमिति उद्देशेन पाठोऽयं प्रस्तूयते ।



AP SCERT

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. पाठस्थाः श्लोकाः कं विषयं बोधयन्ति ?

२. शिक्षाविषये भवताम् अभिप्रायः कः ?

३. वयं परिसरेभ्यः कान् गुणान् प्राप्तुं शक्नुमः ?

**आ) योजयन्तु ।**

| जन्तुः | गुणः |
|---|---|
| १. बकः | क) स्वल्पसन्तोषः |
| २. गर्दभः | ख) सूक्ष्मदर्शनम् |
| ३. वायसः | ग) नित्यं ससन्तोषः तिष्ठेत् |
| ४. कुक्कुरः | घ) सर्वाणि कार्याणि निष्ठया साधयेत् । |
| ५. शुनकः | च) प्रातरुत्थानम् |
| ६. सिंहः | छ) सर्वारम्भेण कार्यकरणम् |

**इ) अधः दत्तमनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।**

अस्माकं दैनन्दिनजीवने धेनवः, अजाः, महिष्यः, महिषाः इत्येतादृशाः जन्तवः बहवो दृश्यन्ते । तेषु धेनुसदृशाः जन्तवः घासादीन् चर्वन्ति । ते आहारखादनानन्तरं चर्वितस्य आहारस्य पुनः चर्वणं कुर्वन्ति । एतदेव वयं चर्वितचर्वणमिति वदामः । विद्याभ्यासप्रसङ्गे पठितस्य पुनः पुनः पठनं मननञ्च चर्वितचर्वणं नाम । अतः गुणोऽयं धेनोः शिक्षणीयः सर्वैः ।

१. चर्वितचर्वणं नाम किम् ?

२. के के जन्तवः चर्वितचर्वणं कुर्वन्ति ?

३. धेनोः कः गुणः शिक्षणीयः ?

४. अनुच्छेदस्यास्य शीर्षिकां सूचयन्तु ।

**ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. स्त्रियमापद्गतां रक्षेत् इत्यस्य अर्थः कः ?

२. श्लोकानां रचयिता कः ? तस्य वैशिष्ट्यं किमिति लिखन्तु ।

३. अस्मात् पाठात् के गुणाः केभ्यः शिक्षणीयाः इति सूचयन्तः पट्टिकां कुर्वन्तु ।

AP SCERT

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. अलसत्वेन का हानिर्भवति ?

२. केषु विषयेषु निशितपरिशीलनं करणीयं भवति ?

३. पाठे बहूनि नैतिकमूल्यानि दत्तानि सन्ति । तेषु भवान् / भवती केषां मूल्यानां पालनं करोति ?

### आ) अधः दत्तानां प्रश्नानां समाधानानि निबन्धरूपेण लिखन्तु ।

१. कार्यं सामर्थ्यपूर्वकं यदि न क्रियते तर्हि किं भविष्यति?

२. गृहपरिसरस्थानां जन्तूनां व्यवहारं परिशील्य स्वीयवाक्यैः वर्णयन्तु ।

### इ) सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।

१. इतर प्राणिषु वयं किं किं शिक्षेम इति करपत्ररूपेण लिखन्तु ।

२. अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

విద్యార్థి గురువు నుండి కొంత జ్ఞానాన్ని (25%) పొందుతాడు. ఇంకొంత జ్ఞానాన్ని (25%) విద్యార్థి స్వయం ప్రతిభచే, మరికొంత జ్ఞానాన్ని (25%) సహవిద్యార్థుల నుండి పొందుతాడు. కాలానుగుణంగా అనుభవంతో మరికొంత జ్ఞానాన్ని (25%) పొంది సంపూర్ణజ్ఞాని అవుతాడు.

## III. भाषांशाः

### 1. पदजालाभिवृद्धिः

### अ) अधः रेखाङ्कितानां पदानां समानार्थकानि पदानि मञ्जूषातः चित्वा तान्युपयुज्य नूतनवाक्यानि लिखन्तु ।

**काकः, केसरी, कह्वः, भषकः, खरः, कृकवाकः, नरः**

१. गर्दभः अविश्रान्तं कार्यं करोति ।

२. श्वा चोरं दृष्ट्वा भषति ।

३. सिंहः अपि प्रयत्नेन आहारं सम्पादयति ।

४. कुक्कुटः उच्चैः शब्दं करोति ।

५. वायसः आकाशे डयनं करोति ।

६. बकः श्वेतवर्णः भवति ।

### आ) अधः निर्दिष्टपदेभ्यः रेखाङ्कितपदस्य पर्यायपदं चिनुत ।

१. रासभः शीघ्रं न धावति ।

अ) सिंहः  आ) बकः  इ) गर्दभः  ई) खगः

२. व्याधस्य दर्शनेन पक्षी डयनं करोति ।

अ) कह्वः  आ) खगः  इ) मृगराजः  ई) खरः

AP SCERT

३. श्वा दण्डं दृष्ट्वा धावति ।

अ) कुक्कुटः आ) सिंहः इ) शुनकः ई) वायसः

४. कृकवाकः प्रातः गृहस्योपरि उपविशति ।

अ) कह्वः आ) कुक्कुटः इ) वायसः ई) खरः

## इ) रेखाङ्कितानां पदानां विरुद्धार्थकपदानि कोष्ठकात् चित्वा लिखन्तु ।

**(शीतम्, शयनम्, मन्दम्, आलस्यम्, अप्रमादः, शत्रुभिः)**

१. प्रातः उत्थानं स्वास्थ्याय समीचीनं भवति ।

२. अनालस्यं कार्यसाधकलक्षणम् ।

३. ग्रीष्मकाले जलम् उष्णं भवति ।

४. शीघ्रचेतनः छात्रः ज्ञानी भविष्यति ।

५. बन्धुभिः सह भोजनं करणीयम् ।

## 2. व्याकरणांशाः

## अ) अधः दत्तानां पदानां सन्धिं / सन्धिविच्छेदनं कृत्वा सन्धिनामानि लिखन्तु ।

१. देशोपपन्नानि

२. चत्वार्येतानि

३. वहेद्धारम्

४. सर्वेन्द्रियाणि

५. बहु + आशी

६. शीत + उष्णम्

### * अधः दत्तानि सन्धिपदानि परिशीलयन्तु, विवरणञ्च अवगच्छन्तु ।

बालः + तत्र = बालस्तत्र (ः + त, ः → स् = स्त)

शूरः + च = शूरश्च (ः + च, ः → श्= श्च)

डयमानः + टिट्टिभः = डयमानष्टिट्टिभः (ः + ट, ः → ष् = ष्ट)

*** विसर्गस्य तथयोः परयोः सकारः, चछयोः परयोः शकारः, टठयोः परयोः षकारः आदेशत्वेन भवति ।**

| | | | |
|---|---|---|---|
| विसर्गः + त / थ | = | स् | (स्त / स्थ) |
| विसर्गः + च / छ | = | श् | (श्च / श्छ) |
| विसर्गः + ट / ठ | = | ष् | (ष्ट / ष्ठ) |



AP SCERT

| | | |
|---|---|---|
| हरिः + शेते | = हरिश्शेते / हरिःशेते | (ः + श = ः / श) |
| सुरेशः + षष्ठः | = सुरेशष्षष्ठः / सुरेशःषष्ठः | (ः + ष = ः / ष) |
| शिष्यः + सेवते | = शिष्यस्सेवते / शिष्यःसेवते | (ः + स = ः / स) |

*** विसर्गस्य श - ष - स इत्येतेषु वर्णेषु परेषु विकल्पेन क्रमात् शषसाः एव आदेशरूपेण भवन्ति ।**

**विसर्गः + श-ष-स = श्, ष्, स्**

अयं च कश्चन विसर्गसन्धेः भेदः ।

*** अधः दत्तानि सन्धिपदानि परिशीलयन्तु विवरणञ्च अवगच्छन्तु ।**

| | | |
|---|---|---|
| मुनिः + इति | = मुनिरिति | (इः + इ = र्) |
| गुरुः + आगच्छति | = गुरुरागच्छति | (उः + आ = र्) |
| कविः + एष्यति | = कविरेष्यति | (इः + ए = र्) |
| धेनुः + गच्छति | = धेनुर्गच्छति | (उः + ग = र्) |
| एतैः + भक्षितम् | = एतैर्भक्षितम् | (ऐः + भ = र्) |

*** अ/आ वर्जयित्वा अन्यस्वरात् परस्य विसर्गस्य स्वरेषु मृदुव्यञ्जनेषु परेषु रेफादेशो भवति ।**

**अ, आ इत्येतौ विना स्वराः + ः + अश्, = र्**

अयं च कश्चन विसर्गसन्धेः भेदः ।

**ई) अधः दत्तमनुच्छेदं पठित्वा निर्देशानुसारं विशेषण-विशेष्याणि पृथक् कुर्वन्तु ।**

अस्माकं विद्यालये व्यासपूर्णिमां महता वैभवेन आचरामः । तस्मिन् दिने छात्राः सर्वे नूतनानि वस्त्राणि धरन्ति । बालकाः हरितैः पर्णैः विद्यालयं सुन्दरतया अलङ्कुर्वन्ति । बालिकाः सुगन्धीनि पुष्पाणि आनयन्ति । अस्माकं विशालस्य विद्यालयस्य प्रकोष्ठेषु सुन्दराः व्यासचित्रपटाः सन्ति । वयं तस्मिन् दिने ज्ञानदायिन्याः सरस्वत्याः, परमगुरोः व्यासस्य च चित्रपटौ स्थापयामः। वयं दीर्घाभ्यां मालाभ्यां चित्रपटौ अलङ्कुर्मः । तयोः पूजनानन्तरं वयम् अस्माकं स्नेहशीलिनः, ज्ञानवतः अध्यापकान् पूजयामः । अन्ततः वयं मधुरस्य वितरणेन कार्यक्रमं समापयामः। यथाशक्ति समीपस्थासु दीर्घासु वीथीषु पवित्रं देवप्रसादं वितरामः।

| विशेषणानि | विशेष्याणि |
|---|---|
| | |

**परियोजनाकार्यम्**

१. ईदृशान् मूल्ययुक्तश्लोकान् सङ्गृह्य भित्तिपत्रे लिखित्वा कक्ष्यायां लेपयन्तु ।
२. पाठे उक्तमूल्यैः सह वैय्यक्तिकलक्षणानि तोलयन्तः पट्टिकां कृत्वा आनयन्तु ।



AP SCERT

# ५. वृद्धोपदेशः

K8L9A8

## पठन्तु, विचिन्त्य वदन्तु

गुरुः छात्रान् उपदिशति -

"सत्यं वद । धर्मं चर । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव ! स्वाध्यायान्मा प्रमदः। यानि अनवद्यानि कर्माणि तानि सेवितव्यानि । नो इतरणि यानि अस्माकम् सुचरितानि तानि सेवितव्यानि" इति ।

## प्रश्नाः ?

१. एषः उपदेशः कः कस्मै ददाति ?

२. अस्य उपदेशस्य आवश्यकता का ?

३. अनेन उपदेशेन किं सिद्ध्यति ?

## उद्देश्यम्

* महावीरपुरुषाणाम् आदर्शवृत्तान्तपठनेन छात्रेषु देशभक्तेः त्यागनिरतेः वर्धनम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।

२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।

३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।



AP SCERT

जय जय श्रीराम !

जय जय रघुराम !

पतितपावन भक्तजनावन !

सीतारमण दीनरक्षक !

(मार्गस्य दृश्यम् । शिवाजी, तानाजी, नीराजी, येसाजी - एते संन्यासिवेषधारिणः भजनं कुर्वन्तः प्रविशन्ति ।)

शिवाजी - नीराजिन् ! अस्माकं संन्यासिवेषं यः कोऽपि जानीयात् किमिति मम सन्देहः ।

नीराजी - शिवाजिन् तत्र भयम् एव मास्तु । कोऽपि न जानाति इत्येव मम दृढः विश्वासः।

शिवाजी - तर्हि भजनं कुर्वन्तः एव राजमार्गेण गच्छामः । (पुनः भजनम् ) जय जय श्रीराम....

(गृहद्वारे एका वृद्धा गृहिणी ।)

वृद्धा - (स्वगतम्) एते के भजनं कुर्वन्तः मार्गे गच्छन्ति ? संन्यासिनः इव आभान्ति । (दृष्टिं प्रसार्य परीक्षते ।) न, न । एषः शिवाजी, सपरिवारः गच्छति । अस्तु, तान् सर्वान् मम गृहम् आह्वयामि । (प्रकाशम्) भोः यतिवराः ! कृपया मम गृहम् आगत्य, पावनं कुर्वन्तु ।

तानाजी - पश्यतु, सा गृहिणी अस्मान् संन्यासिनः इत्येव भावयति । कथम् अस्ति अस्माकं वेषः ?

वृद्धा - (शिवाजिनम् उद्दिश्य) साधुमहाराजाः मम गृहम् आगच्छन्तु । केवलं फलानि स्वीकृत्य गच्छन्तु । तेन अहं पवित्रा भवामि ।

(परस्परं मुखं पश्यन्ति ।)

वृद्धा - भवन्तः किं चिन्तयन्ति ? अन्तः आगच्छन्तु । (सर्वे गृहं प्रविशन्ति ।)

(नेपथ्ये) ''अम्ब ! मम विलम्बः जातः । स्थालिकां स्थापयित्वा उपविष्टवान् अस्मि । शीघ्रं परिवेषयतु !'')

वृद्धा - (नेपथ्यम् उद्दिश्य) वत्स ! एषा अहम् आगता । क्षणं प्रतीक्षताम् । (प्रकाशम्) महाराजाः, अत्र उपविशन्तु । (उपवेशनार्थं मञ्चं प्रदर्शयति ।) मम पुत्रः भोजनार्थम् उपविष्टः अस्ति । तस्मै अन्नादिकं परिवेष्य आगच्छामि । (अन्तः प्रविशति।)

येसाजी - गुरुदेव ! अत्र आगच्छतु । सर्वे उपविशाम ।

(सर्वे उपविशन्ति ।)

नीराजी - एषोऽहं भवतां सर्वेषां शिष्यः, न गुरुः। समर्थरामदासः एकः एव यथार्थः गुरुदेवः। वयं सर्वे कपटसंन्यासिनः। एतेन कपटवेषेण अहम् अतीव खिन्नः अस्मि । महाराज ! अस्माकम् एतत् विडम्बनं कदा समाप्तं भविष्यति ?



AP SCERT

शिवाजी - नीराजिन् ! गुरुः कः, शिष्यः कः इति विचारः इदानीं न प्रस्तुतः । अस्माकं कार्यं सुसम्पन्नं भवेत् । तदेव अस्माकं मुख्यं ध्येयम् । रायगढपर्यन्तम् अस्माभिः गन्तव्यम् इति भवन्तः स्मरन्ति खलु !
(फलानि हस्ते स्वीकृत्य वृद्धा प्रविशति ।)



वृद्धा - महाराज ! क्षम्यताम् । समयः अतीतः । इमानि फलानि स्वीकरोतु । (क्षणकालानन्तरम्) श्रीमन्, छत्रपतिः शिवाजी बद्धः इति श्रुतम् । किन्तु इदमिदानीं सः बन्धनात् मुक्तः इत्यपि श्रुतवती । एतद्विषये भवन्तः किमपि जानन्ति वा ?
(एषा कथं वार्तां ज्ञातवती इति - सर्वे आश्चर्यं प्रकटयन्ति ।)

नीराजी - अम्ब ! वयं संन्यासिनः । प्रवाहजलवत् वयं सञ्चरणशीलाः । एकत्रैव न तिष्ठामः। वयं राजकार्यं कथं जानीमः ?

वृद्धा - अन्यथा मा भावयन्तु । सामान्यतया एव भवतः पृष्टवती ।
(कञ्चित्कालं तूष्णीं स्थित्वा)
महाराज ! भवतः अनुमतिः अस्ति चेत् मम एकं सन्देहं परिहर्तुम् इच्छामि ।

नीराजी - कः सन्देहः ? अवश्यं निवेदयतु ।

वृद्धा - एतत् भवतां काषायवस्त्रं खलु ! वस्त्रस्य अन्तः खड्गः स्थापितः । खड्गस्य संन्यासिनां च कः सम्बन्धः इति सन्देहः । (सर्वे विस्मिताः)

| | | |
|---|---|---|
| शिवाजी | - | अम्ब ! भवत्याः सकाशे रहस्यगोपनेन किं प्रयोजनम् ? वयं सर्वे शिवाजिसैनिकाः। तस्य शोधनार्थं वयं प्रस्थिताः । अम्ब, भवतीं प्रार्थयामः यत् एषा वार्ता कुत्रापि न प्रकटनीया, गोपनीया चेति । |
| वृद्धा | - | अस्तु, कुत्रापि न कथयामि ।<br>((नेपथ्ये) ''अम्ब, सूपं परिवेषयतु ।'') |
| वृद्धा | - | बालः भोजनं कुर्वन्नस्ति । सूपं परिवेष्य आगच्छामि । (अन्तः गत्वा आगच्छन्ती स्वगतम्) एषः बालः कदलीपर्णे भोजनं कर्तुम् अपि न जानाति । यत् एतस्य भोजनं, शिवाजिनः दुर्गाणां स्वाधीनीकरणमिति एतदुभयम् अपि समानम् । |
| शिवाजी | - | (आश्चर्येण) अम्ब ! शिवाजिविषये भवती किमर्थम् एवं वदति ? |
| वृद्धा | - | पश्यतु, शिवाजी दुर्गाणि बहूनि आक्रम्य स्वाधीनानि करोति । किन्तु तेषाम् एकसूत्रतां न कल्पयति । अतः अन्नतः यथा सूपः प्रवहन् निःसरति तथा दुर्गाणि अपि शिवाजिहस्ततः च्युतानि भवन्ति । शिवाजी राजतिलकः भवेत् । तदानीम् एव हिन्दुस्थानस्य उन्नतिः ।<br>(नेपथ्ये - ''जय जय रघुवीरसमर्थ'' इति ध्वनिः) |
| सर्वे | - | अये ! गुरुवराः समर्थरामदासाः आगताः ।<br>(समर्थरामदासः प्रविशति । सर्वे उत्तिष्ठन्ति, गरुं नमस्कुर्वन्ति च ।) |
| रामदासः | - | (शिवाजिनम् उद्दिश्य) भवान् शीघ्रम् एव राजतिलकः भविष्यति । |
| शिवाजी | - | गुरुदेव, अहं तु स्वराज्यकामः कश्चन सैनिकः । मम सिंहासनाशा नास्त्येव । राज्यपदारोहणे मयि योग्यता अपि नास्ति । |
| रामदासः | - | शिव, सिंहासने उपवेष्टुं भवान् न योग्यः वा ? एवं तर्हि विदेशीयाः यवनाः किं योग्याः? अथवा यवनपदसेवकाः, राष्ट्रद्रोहकाः अस्मदीयाः योग्याः वा ? विचारयतु । भवान् स्वराज्यस्य संस्थापकः भवतु । एषा अम्बा यत् उक्तवती तत् सत्यम् एव । भवान् राजतिलकं धारयतु । तत् अवश्यं भवेत् एव ।<br>(सर्वे स्तब्धाः तिष्ठन्ति । समर्थः गच्छति । न कोऽपि लक्षयति ।) |
| शिवाजी | - | अरे, समर्थाः गताः वा ? |
| वृद्धा | - | क्षम्यतां महाराज ! अहं भवन्तम् अज्ञात्वा ............... |
| शिवाजी | - | तथा न मन्तव्यम् । समर्थाः इव भवती अपि मम गुरुः । भवत्याः कामनां सफलां करोमि । स्वराज्यस्य स्वधर्मस्य च रक्षणाय अहं यतिष्ये । वयं साधयामस्तावत्।<br>(इत्युक्त्वा सर्वे वृद्धाम् अभिवन्द्य गच्छन्ति ।)<br>**(''जयतु भारतकुलतिलकः शिवाजिमहाराजः'' इति घोषणं कुर्वन्ति ।)** |

(पटाक्षेपः)



AP SCERT

**कविपरिचयः**

गणपय्यहोल्लमहोदयेन विरचितः एषः पाठ्यंशः 'नवरूपकम्' इति सङ्कलनग्रन्थात् स्वीकृतः । अयं कविः कर्णाटकराज्ये सुप्रसिद्धः कविपण्डितः ।

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. बालस्य भोजनं - शिवाजिनः दुर्गाणां स्वाधीनीकरणम् इत्येतत् उभयमपि समानम्' इति वृद्धा किमर्थम् उक्तवती ?
२. अस्य पाठस्य अन्यां शीर्षिकां सूचयन्तु ।
३. शिवाजीमहाराजस्य स्वभावम् अधिकृत्य वदन्तु ।

**आ) अधः दत्तानां वाक्यानां समानार्थकवाक्यानि पाठात् चित्वा लिखन्तु ।**

१. वयं जलप्रवाह इव सञ्चरामः ।
२. राजा भवितुं मम अर्हता नास्ति ।
३. अहं राजा भविष्यामि ।
४. परिपालनाकेन्द्रीकरणं न करोति ।

**इ) अधः दत्तम् अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।**

'वत्स ! गुरुकुले त्वम् आचार्यमुखात् सर्वम् अधीतवान् असि । तथापि कर्तव्यबुद्ध्या किञ्चित् उपदिशामि । शृणु, अधिकारमदः धनमदः च नृपं मार्गभ्रष्टं करोति । अतः त्वं जागरूको भव ! स्वार्थसम्पादकाः त्वां परितः चरिष्यन्ति । तान् उपायेन दूरीकरोतु । सज्जनाः अर्हाः च पर्णान्तरफलानि इव दूरे तिष्ठन्ति । तान् अन्विष्य पोषय । अर्हान् पुरस्कुरु । दण्ड्यान् दण्डय । गुरुजनान् आदरेण पश्य । अधीनेषु नियमपालनविषये कठोरो भव । साहाय्यकरणे मृदुताम् आचार । मुनिजनान् भक्त्या नमस्कुरु । बान्धवान् अनुचिते स्थाने मा प्रतिष्ठापय । अर्हजनान् उचितस्थाने नियोजय । पक्षपातं मा कुरु । प्रजाः पुत्रवत् पालय । सर्वदा कर्तव्यं पालय, तेन त्वं लोकपूजको भविष्यसि ।'

१. राज्ञः समीपे के चरन्ति ? के दूरे तिष्ठन्ति ?
२. के राज्ञः मार्गभ्रष्टकारकाः भवन्ति ?
३. राजा कदा लोकपूजको भविष्यति ?
४. एतानि वाक्यानि कः कं प्रति उक्तवान् ?
५. अनुच्छेदस्य शीर्षिकां सूचयन्तु ।



AP SCERT

ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. राजमार्गेण के गच्छन्ति ? कुत्र गच्छन्ति ?
२. वृद्धा शिवाजिनः दुर्गाणां विषये किम् उक्तवती ?
३. वृद्धा शिवाजिनः बन्धनविषये किं पृष्टवती ?
४. शिवाजी कथं राज्यरक्षणं कर्तुम् इच्छति ?
५. शिवाजी महाराजस्य अन्तिमं समाधानं किम् ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. समर्थरामदासस्य उद्देशः कः इति भवन्तः भावयन्ति ?
२. वृद्धा शिवाजिनं किं सूचितवती ?
३. अस्य पाठस्य शीर्षिका कथं सार्था भवतीति लिखन्तु ।

आ) अधः दत्तयोः प्रश्नयोः समाधानानि निबन्धरूपेण लिखन्तु ।

१. 'वृद्धोपदेशः' इति पाठ्यभागसारांशं स्वीयवाक्यैः लिखन्तु ।
२. पाठाधारेण शिवाजिनः वृद्धायाः, रामदासस्य च स्वभावचित्रणं कुर्वन्तु ।

इ) सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।

१. भारत देशस्य समैक्यतां, समग्रतां च स्थापनाय किं कुर्मः ?
२. भारतदेशस्य रक्षणार्थं शिवाजिमहराजेन कृतं प्रयत्नम् अधिकृत्य लिखन्तु ।

## III. भाषांशाः

### १.पदजलाभिवृद्धिः

अ) अधः दत्तानां रेखांङ्कितपदानाम् अर्थान् अवगम्य, तान्युपयुज्य स्वीयवाक्यानि लिखन्तु ।

१. शीघ्रं परिवेषयतु अम्ब !
२. अहं बहुकालतः प्रतीक्षां करोमि ।
३. महाराज ! अस्माकम् एतत् विडम्बनं कदा समाप्तं भविष्यति ?
४. कुत्रापि न प्रकटनीया, गोपनीया चेति ।
५. कदलीपर्णे भोजनं कर्तुं न जानाति ।
६. तेषाम् एकसूत्रतां न कल्पयति ।
७. भवत्याः कामनां सफलां करोमि ।

उदा - विलम्बं

किमर्थम् विलम्बं करोषि ? शीघ्रम् आगच्छ ।



AP SCERT

आ) अधः दत्तानि वाक्यानि वर्तमानकाले सन्ति । तेषां कालपरिवर्तनं (भूतकाले, भविष्यत्काले) कृत्वा पुनः वाक्यानि लिखन्तु ।

उदा - भजनं कुर्वन्तः एव राजमार्गेण गच्छामः । (वर्तमान)
भजनं कुर्वन्तः एव राजमार्गेण अगच्छाम । (भूत)
भजनं कुर्वन्तः एव राजमार्गेण गमिष्यामः । (भविष्यत्)

१. सा गृहिणी अस्मान् संन्यासिनः इत्येव भावयति ।
२. भवन्तः किं चिन्तयन्ति ?
३. सर्वे तत्र तिष्ठन्ति ?
४. किञ्च वयं राजकार्यं कथं जानीमः ?
५. एकं सन्देहं परिहर्तुं यते ।
६. शिवाजीविषये भवती किमर्थम् एवं वदति ?
७. न कोऽपि लक्षयति ।
८. स्वधर्मस्य रक्षणार्थम् अहं प्रयत्नं करोमि ।

## २. व्याकरणांशाः

अ) अधः दत्तानि पदानि विभज्य सन्धिनामानि लिखन्तु ।

उदा - परमार्थः = परम + अर्थः - सवर्णदीर्घसन्धिः

| | |
|---|---|
| १. स्वागतम् | ५. तान्येव |
| २. एकत्रैव | ६. वागीशः |
| ३. कुत्रापि | ७. नास्त्येव |
| ४. अजादिः | ८. सच्चरित्रम् |

आ) अधः दत्तानां पदानां विग्रहवाक्यानि समासनामानि च लिखन्तु ।

उदा - रमानाथः = रमायाः नाथः - षष्ठीतत्पुरुषसमासः

| | |
|---|---|
| १. सीतारमणः | ४. अज्ञानम् |
| २. नीलोत्पलम् | ५. राज्यपदारोहणे |
| ३. दीनरक्षकः | ६. भीमार्जुनौ |

AP SCERT

### इ) रेखाङ्कितपदेभ्यः धातुप्रत्ययान् विभज्य लिखन्तु ।

उदा : पिता वस्तूनि क्रीत्वा गृहम् आनयति । क्रीञ् + क्त्वा

१. आपणं गत्वा दुग्धम् आनयति ।
२. स्नानं कृत्वा पाठशालां गच्छति ।
३. मार्गे देवालयस्य पुरतः स्थित्वा देवं नमति ।
४. पाठशालायां पाठं पठित्वा पुस्तिकासु लिखति ।
५. पुस्तिकासु लिखित्वा गुरुं दर्शयति ।
६. बालकैः सह कन्तुकेन क्रीडित्वा गृहं गच्छति ।
७. रात्रौ भोजनं गृहीत्वा स्वकोष्ठं प्रविशति ।
८. दुग्धं पीत्वा स्वपिति ।

**परियोजनाकार्यम्**

कस्यचन देशभक्तस्य जीवनचरितम् पठन्तु । तस्य औन्नत्यं लिखित्वा कक्ष्यायां श्रावयन्तु ।

## विषयविस्तरः

### साहित्यस्वरूपम्

* काव्यानि गद्य - पद्य - चम्पूरूपेण त्रिधा विभक्तानि । काव्यानाम् दृश्यकाव्यानि, श्रव्यकाव्यानि इति अपरविभागोऽपि वर्तते ।

* दृश्यकाव्यं नाम द्रष्टुं योग्यं काव्यम्, अभिज्ञानशाकुन्तलनाटकादिकम् । श्रव्यकाव्यं नाम श्रोतुं योग्यं काव्यम् रघुवंशादिकम् । नाटकमित्यस्य संस्कृते रूपकमिति व्यवहारः ।

* दशप्रकाराणि रूपकाणि सन्ति । तेषु नाटकमन्यतमम् ।
  तद्यथा -

**“नाटकं सप्रकरणं भाणः प्रहसनं डिमः ।**
**व्यायोगसमवाकारौ वीथ्यङ्केहामृगा दश” ॥**



AP SCERT

# ६. विवेकध्वनिः

C4M1J3

## पठन्तु, विचिन्त्य वदन्तु

| | | |
|---|---|---|
| अध्यापकः | - | छात्राः । भवतां के इष्टाः । |
| सतीशः | - | मम मातापितरौ, गुरुश्च । |
| कौमुदी | - | श्रीशङ्कराचार्यः । |
| अनूषा | - | शिवाजिमहाराजः । |
| ललिता | - | स्वामिविवेकानन्दः । |
| अध्यापकः | - | किमर्थम् ? |
| ललिता | - | अस्माकं सनातनधर्मस्य औन्नत्यं विश्वे सर्वत्र प्रसारितवान् सः,अतः । |
| अध्यापकः | - | भवत्या कथं ज्ञातम् ? |
| ललिता | - | मम पित्रा उक्तम् । मम गृहे विवेकानन्दग्रन्थाः बहवः सन्ति । तेषु कांश्चन अंशान् अहं पठितवती । |
| अध्यापकः | - | किं भवत्या पठितम् ? |
| ललिता | - | विवेकानन्दः मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव इत्यतिरिच्य दरिद्रदेवो भव । मूर्खदेवो भव ! इति उक्तवान् । |
| अध्यापकः | - | भवत्या समीचीनमुक्तम् । अद्य वयं विवेकानन्दस्य महोन्नतजीवनस्य विशेषांशान् ज्ञास्यामः । |

## प्रश्नाः ?

१. कौमुद्याः कः इष्टः ?
२. विवेकानन्दः किं किम् उक्तवान् ?
३. विवेकानन्देन विश्वे प्रसारितः विषयः कः ?

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।



AP SCERT

## उद्देश्यम्

विवेकानन्दः श्रीरामकृष्णपरमहंसस्य शिष्यः । सः सनातनधर्मस्य, संस्कृतेः केन्द्रबिन्दुः असीत्। विवेकानन्दः आधुनिकयुगस्य आध्यात्मिकवेत्तॄणां श्रेष्ठः ।सर्वधर्मसभासु अन्येषु प्रसङ्गेषु च भारतदेशस्य औन्नत्यं प्रपञ्चदेशेषु सर्वत्र प्राकाशयत् । सः भारतीयान् भारतावनेः उत्कृष्टां संस्कृतिं, पूर्ववैभवम्, अस्माकं कर्तव्यञ्च उदबोधयत् । विवेकानन्दः विश्वजनीनः आदर्शपुरुषः । विविधसेवाकार्यक्रमाणां स्रष्टा यतिवर्यः च । स्वस्य अल्पजीवनकाले एव अनल्पकार्याणि समसाधयत् सः । विवेकानन्दस्य स्मरणं छात्राणां कृते स्फूर्तिदायकं प्रेरणादायकं च भवति ।



कोल्कतायां निवसन् नरेन्द्रः इति कश्चन सामान्यः युवकः 'विश्वविजयी विवेकानन्दः'इति ख्यातिं प्राप्य विश्वयुवत्वं प्राप्नोत् । तस्य स्वामिनः विवेकानन्दस्य जन्मनः १५० तमवर्षोत्सवः, क्रै.श. २०१३ वर्षे न केवलं भारते, अपि तु विश्वस्मिन् विश्वे सर्वेष्वपि देशेषु विविधैः कार्यक्रमैः आचरितः। यूनां, महिलानां, प्रबुद्धनागरिकाणां च कृते विभिन्नस्तरीयाः कार्यक्रमाः, तथैव ग्रामविकासादयः, विविधाः योजनाः च अस्य अङ्गतया स्वाश्रय-स्वाभिमान-मानवविकासाय समायोजिताः । तस्मिन्नवसरे समाजसेवायै विकसितमनस्कैः भाव्यमिति विवेकानन्दस्य वचनान्येवं स्मृतानि-''विकासः एव जीवनं, सङ्कोचः एव मरणम्''इति । अयं विषयः अत्यन्तं महत्त्वपूर्णः वर्तते ।

जीवनस्य लक्षणमेव विकासः नाम । सः विकासः विभिन्नेषु स्तरेषु भवति । शरीरस्य, मनसः, बुद्धेः, बोधस्य, आत्मीयतायाः, समाजस्य, देशस्य, प्रपञ्चस्य......इत्येवं तस्य आवली सुदीर्घा । इदं चिन्तनं सर्वेषु अपि स्तरेषु योजनीयम् । व्यक्तिस्तरे, कुटुम्बस्तरे, ग्राम-नगर-राज्य-देश-विश्वस्तरेषु, व्यवस्था-योजना-शैली-कार्यादिषु......इत्येवं रीत्या व्यक्तिजीवनस्य समाजजीवनस्य च सर्वेष्वपि अंशेषु विकासः सम्पादनीयः। अनेन एव परिवर्तनं भवति । तत् परिवर्तनं जनोपयोगि, परिणामकारि, सफलं सबलं च भवेत् ।



AP SCERT

परिवर्तनमात्रं न, विकासोन्मुखं परिवर्तनम् अपेक्ष्यते । व्यक्तिगतदृष्ट्या चिन्तयेम चेत् शरीरचिन्तनमेव प्रथमं भवेत् । 'शरीरमाद्यं खलु धर्मसाधनम्' सुशक्तशरीरं, सुदृढम् अरोगं शरीरं च स्वास्थ्यं द्योतयति । अतः एव स्वामिवर्यः उक्तवान् - पादकन्दुकेन क्रीड । गीतापठनात् पूर्वम् एतत् कार्यं भवेत् । तेन सुशक्तमस्तिष्कं सिद्धं भवेत्, तदा गीतायाः महत्त्वं सम्यक् अवगन्तुं शक्येत' इति । तेनैव सह सः उक्तवान् - 'अयस्तुल्यमांसपेशीयुक्ताः, लोहसमाननाडीयुक्ताः वीराः, धीराः युवानः अपेक्षिताः' इत्यपि । परन्तु दृढशरीरमात्रं न, दृढं मनः अपि अपेक्षितम् । मनः दौर्बल्यम् इति शब्दं न शृणुयात् । भयरहितं स्नेहकारुण्यमयं च भवेत् हृदयम् । तथैव अतितीक्ष्णा दृढा मतिः भवेत् । एतदर्थम् उत्तमानि पुस्तकानि पठनीयानि । शास्त्रपठनं करणीयम् । योग्यायोग्यविवेचनशक्तिः युक्तिः च वर्धनीया । अद्यतनसमस्यानां पुरतः अचलाः भूत्वा योग्यं किमिति विचिन्त्य मानवतायाः विकासाय यत्नः करणीयः । एतदर्थं हृदयवैशाल्यं सम्पादनीयम् ।

अनया दृष्ट्या संस्कृतकृतीनाम् अध्ययनम् विशेषलाभदायकं भवेत् । **'अहं कः'** इति चिन्तनं, **'मम'** इत्यस्य अवगमनं, स्वार्थपरित्यागः आध्यात्मिकता विकासस्य लक्षणम् । **'अयं निजः परो वेति गणना लघुचेतसाम्, उदारचरितानां तु वसुधैव कुटुम्बकम्'** इति चिन्तनेन लोकसेवनं करणीयम् । एषा एव भक्तिः । एषा एव पूजा । स्वामिवर्यः स्मारितवान् - **'मानवसेवा एव माधवपूजा'** इति । एषा एव आराधना । एवम् आत्मविकासः प्राप्तव्यः । व्यक्तित्वं च विकासनीयम् ।

अस्यां परिपाट्यां योगः, संस्कृतं, गीता इत्येतेषां महान् उपकारः विद्यते । संस्कृतज्ञैः एतेषां वैशिष्ट्यं ज्ञात्वा अस्माकं विकासाय, समाजस्य विकासाय, राष्ट्रस्य विकासाय च यत्नः कार्यः । संस्कृतज्ञानां विकासः एतेषां पठनेन पाठनेन च भवेत् । स्वस्य स्थानेषु नियतरूपेण कस्यचित् ग्रन्थस्य पठनं पाठनं च सर्वैः आरम्भणीयम् । संस्कृतभाषायाः विकासः सर्वत्र प्रचारणेन, सर्वेषां पठनेन, सर्वत्र उपयोगेन च भवेत् । संस्कृतज्ञानां विकासः ग्रन्थानां पठनेन, स्वाध्यायेन, सर्वेषां पाठनेन च भवेत् । अनेन अस्माकं व्यक्तित्वस्य संस्कृतज्ञत्वस्य च विकासः सिध्येत् ।

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

#### अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।

१. जीवनस्य लक्ष्यं किम् ?

२. युवानः किमर्थं बलोपासकाः भवेयुः ?

३. विवेकानन्दः पादकन्दुकेन क्रीड इति किमर्थम् उक्तवान् ?

४. अस्मिन् पाठे भवद्भ्यः रोचकः अंशः कः ? सः किमर्थं रोचकः ?



AP SCERT

आ) अधः दत्तानि वाक्यानि पाठानुसारं क्रमेण लिखन्तु ।

१. मानवसेवा एव माधवपूजा ।

२. विकासः एव जीवनम् - सङ्कोच एव मरणम् ।

३. अयस्तुल्यमांसपेशीयुक्ताः, लोहसमाननाडीयुक्ताः धीराः अपेक्षिताः ।

४. शरीरमाद्यं खलु धर्मसाधनम् ।

इ) अधः दत्तम् अनुच्छेदं पठित्वा समाधानानि लिखन्तु ?

नचिकेताः वाजश्रवसः विश्वावरदेव्याः च पुत्रः । सः श्रद्धावान्, अत्यन्तमेधावी च । प्रभाते उत्थानं, पूजार्थं पुष्पापचयनं, दैवप्रार्थनं, गोपूजनं च तस्य नित्यकार्याणि अभवन् । एकदा वाजश्रवाः विश्वजिद्यागम् अकरोत् । यागाङ्गत्वेन वाजश्रवाः ब्राह्मणेभ्यः गोदानं कृतवान् ।

१. नचिकेताः कस्य पुत्रः ?

२. सः कीदृशः ?

३. तस्य नित्यकार्याणि कानि ?

४. वाजश्रवाः कं यागं कृतवान् ?

ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. विवेकानन्दः किं सूचितवान् ?

२. जीवनविकासः कीदृशेषु स्तरेषु भवति ?

३. मस्तिष्कं केन सिद्धं भवेत् ?

४. संस्कृतभाषायाः विकासः कथं भवेत् ?

५. संस्कृतज्ञैः कीदृशेषु विषयेषु यत्नः कार्यः ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. कस्मिन् स्तरे भवता विकासः सम्पद्यते ? किमर्थम् ?

२. क्रीडानाम् उपयोगाः के ? भवद्भ्यः रोचमाणा क्रीडा का ?

३. विवेकानन्देन धीराः युवानः अपेक्षिताः । किं कारणम् ?

४. लोकसेवनं कथं कर्तुं शक्यते ?

आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. मानवविकासाय कानि कार्याणि कर्तव्यानि ?

२. विवेकानन्दस्य व्यक्तित्वं स्वीयवाक्यैः लिखन्तु ।

AP SCERT

### इ) सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।

१. विवेकानन्दस्य आशयान् प्रशंसन्तः मित्राय पत्रं लिखन्तु ।

१. विवेकानन्दस्य सूक्तीः घोषणा वाक्य रूपेण लिखन्तु ।

२. अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

స్వామి రామతీర్థ పూర్తి పేరు గోస్వామి తీర్థరాముడు. ఆయన తులసీదాస్ వంశానికి చెందినవాడు. తండ్రి పేరు హీరానంద్. విద్యార్థిగా ఉన్నప్పుడే తన గురువుకు ఉత్తరాలు రాస్తుండేవాడు. రామతీర్థ 'వ్యక్తిధర్మం కన్నా మాతృభూమి సేవాధర్మం' గొప్పది అని చెప్పాడు.

## III. भाषांशा :

### 1. पदजालाभिवृद्धिः

### अ) पाठं पठित्वा रेखाङ्कितपदानां समानार्थकपदानि ज्ञात्वा स्वीयवाक्यानि लिखन्तु ।

१. विवेकानन्दः विश्वविजयी इति कीर्तिं प्राप्नोत् ।

२. शरीरविचारः एव प्रथमं भवेत् ।

३. वीराः, धैर्यवन्तः युवानः अपेक्षिताः ।

४. दृढशरीरमात्रं न, किन्तु दृढमनः अपि अपेक्षितं भवति ।

५. अतितीक्ष्णा दृढा बुद्धिः भवेत् ।

### आ) रेखाङ्कितपदानां विरुद्धार्थकपदानि उपयुज्य वाक्यनिर्माणं कुर्वन्तु ।

उदा : धर्मः स्वीयः चेत् आदरणीयः, परकीयः चेत् तिरस्करणीयः ।

१. शुष्कभूमौ पतितं जलं सफलं भवति, पर्वते पतति चेत् ............... भवति ।

२. सबलः किमपि कार्यं कर्तुं प्रभवति, ..................... तु न प्रभवति ।

३. समाजे शक्तः जनः आनन्दम् अनुभवति, ................. जनः दुःखभाक् भवति ।

४. सर्वदा धर्मः एव आचरणीयः, न कदापि ................. आचरणीयः ।

### इ) अधः दत्तम् अनुच्छेदं पठित्वा कः, कदा, किम्, कस्य, कथम् इति पदानां साहाय्येन प्रश्नान् रचयन्तु ।

जीवनस्य लक्षणमेव विकासः । विकासचिन्तनेन परिवर्तनं जनोपयोगि, परिणामकारि, सफलं, सबलं च भवेत् । व्यक्तिगतदृष्ट्या चिन्तयेम चेत् शरीरचिन्तनमेव प्रथमं भवेत् । मनः दौर्बल्यम् इति शब्दं न शृणुयात् । भयरहितं स्नेहकारुण्यमयं च भवेत् हृदयम् ।

उदा - विकासः नाम कः ?

AP SCERT

## 2. व्याकरणांशाः

**अ) अधः दत्तानां पदानां सन्धिविच्छेदनं कृत्वा सन्धिनामानि लिखन्तु ।**

१. नरेन्द्रः
२. सर्वेष्वपि
३. अत्यन्तम्
४. जनोपयोगि
५. तेनैव
६. इत्यस्य
७. नास्ति

**आ) अधः दत्तानां पदानां सन्धिं कृत्वा सन्धिनामानि लिखन्तु ।**

१. कः + चन
२. तथा + एव
३. इति + एनम्
४. विकास + उन्मुखम्
५. इति + अपि
६. एकः + अहम्
७. वसुधा + एव

**इ) अधः दत्तानां समस्तपदानां विग्रहवाक्यानि लिखित्वा, समासनामानि च लिखन्तु ।**

१. नरेन्द्रः
२. जनोपयोगि
३. शरीरचिन्तनम्
४. विश्वविजयी
५. ग्रामविकासः
६. धर्मसाधनम्
७. अरोगः
८. गीतापठनम्

**ई) अधः दत्तम् अनुच्छेदं पठित्वा रेखाङ्कितपदानि कस्यां विभक्तौ विद्यन्ते इति ज्ञात्वा तत् पदं, तस्य विभक्तिं च लिखन्तु ।**

पादकन्दुकेन क्रीडा स्यात्, गीतापठनात् पूर्वं एतत् कार्यं भवेत् । तेन सुशक्तमस्तिष्कं सिद्धं भवेत् । तदा गीतायाः महत्त्वं सम्यक् अवगन्तुं शक्यते । अद्यतनसमस्यानां पुरतः अचलः भूत्वा, योग्यं किम् इति विचिन्त्य, मानवतायाः विकासाय यत्नं कुर्यात् ।

उदा : कन्दुकेन - तृतीया विभक्तिः

**परियोजनाकार्यम्**

विवेकानन्दस्य सूक्तीः सङ्गृह्य भित्तिपत्रे लिखित्वा कक्ष्यायां प्रदर्शयन्तु ।

**अन्नदानं परं दानं विद्यादानमतः परम् ।**

AP SCERT

# शब्दरूपाणि

## १. नकारान्तः पुंलिङ्गः राजन् शब्दः

| ए. व | द्वि. व | ब. व | |
|---|---|---|---|
| राजा | राजानौ | राजानः | - प्रथमा विभक्तिः |
| हे राजन् | हे राजानौ | हे राजानः | - सम्बोधनप्रथमा विभक्तिः |
| राजानम् | राजानौ | राज्ञः | - द्वितीया विभक्तिः |
| राज्ञा | राजभ्याम् | राजभिः | - तृतीया विभक्तिः |
| राज्ञे | राजभ्याम् | राजभ्यः | - चतुर्थी विभक्तिः |
| राज्ञः | राजभ्याम् | राजभ्यः | - पञ्चमी विभक्तिः |
| राज्ञः | राज्ञोः | राज्ञाम् | - षष्ठी विभक्तिः |
| राज्ञि,राजनि | राज्ञोः | राजसु | - सप्तमी विभक्तिः |

## २. तकारान्तः पुंलिङ्गः भवत् शब्दः

| ए. व | द्वि. व | ब. व | |
|---|---|---|---|
| भवान् | भवन्तौ | भवन्तः | - प्रथमा विभक्तिः |
| हे भवन् | हे भवन्तौ | हे भवन्तः | - सम्बोधनप्रथमा विभक्तिः |
| भवन्तम् | भवन्तौ | भवतः | - द्वितीया विभक्तिः |
| भवता | भवद्भ्याम् | भवद्भिः | - तृतीया विभक्तिः |
| भवते | भवद्भ्याम् | भवद्भ्यः | - चतुर्थी विभक्तिः |
| भवतः | भवद्भ्याम् | भवद्भ्यः | - पञ्चमी विभक्तिः |
| भवतः | भवतोः | भवताम् | - षष्ठी विभक्तिः |
| भवति | भवतोः | भवत्सु | - सप्तमी विभक्तिः |

## ३. तकारान्तः पुंलिङ्गः विद्वत् शब्दः

| ए. व | द्वि. व | ब. व | |
|---|---|---|---|
| विद्वान् | विद्वांसौ | विद्वांसः | - प्रथमा विभक्तिः |
| हे विद्वन् | हे विद्वांसौ | हे विद्वांसः | - सम्बोधनप्रथमा विभक्तिः |
| विद्वांसम् | विद्वांसौ | विदुषः | - द्वितीया विभक्तिः |
| विदुषा | विद्वद्भ्याम् | विद्वद्भिः | - तृतीया विभक्तिः |
| विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः | - चतुर्थी विभक्तिः |
| विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः | - पञ्चमी विभक्तिः |
| विदुषः | विदुषोः | विदुषाम् | - षष्ठी विभक्तिः |
| विदुषि | विदुषोः | विद्वत्सु | - सप्तमी विभक्तिः |

AP SCERT

## ४. दकारान्तः पुंलिङ्गः तद् शब्दः

| ए. व | द्वि. व | ब. व | |
|---|---|---|---|
| सः | तौ | ते | - प्रथमा विभक्तिः |
| तम् | तौ | तान् | - द्वितीया विभक्तिः |
| तेन | ताभ्याम् | तैः | - तृतीया विभक्तिः |
| तस्मै | ताभ्याम् | तेभ्यः | - चतुर्थी विभक्तिः |
| तस्मात् | ताभ्याम् | तेभ्यः | - पञ्चमी विभक्तिः |
| तस्य | तयोः | तेषाम् | - षष्ठी विभक्तिः |
| तस्मिन् | तयोः | तेषु | - सप्तमी विभक्तिः |

## ५. दकारान्तः स्त्रीलिङ्गः तद् शब्दः

| ए. व | द्वि. व | ब. व | |
|---|---|---|---|
| सा | ते | ताः | - प्रथमा विभक्तिः |
| ताम् | ते | ताः | - द्वितीया विभक्तिः |
| तया | ताभ्याम् | ताभिः | - तृतीया विभक्तिः |
| तस्यै | ताभ्याम् | ताभ्यः | - चतुर्थी विभक्तिः |
| तस्याः | ताभ्याम् | ताभ्यः | - पञ्चमी विभक्तिः |
| तस्याः | तयोः | तासाम् | - षष्ठी विभक्तिः |
| तस्याम् | तयोः | तासु | - सप्तमी विभक्तिः |

## ६. दकारान्तः नपुंसकलिङ्गः तद् शब्दः

| ए. व | द्वि. व | ब. व | |
|---|---|---|---|
| तत् | ते | तानि | - प्रथमा विभक्तिः |
| तत् | ते | तानि | - द्वितीया विभक्तिः |
| तेन | ताभ्याम् | तैः | - तृतीया विभक्तिः |
| तस्मै | ताभ्याम् | तेभ्यः | - चतुर्थी विभक्तिः |
| तस्मात् | ताभ्याम् | तेभ्यः | - पञ्चमी विभक्तिः |
| तस्य | तयोः | तेषाम् | - षष्ठी विभक्तिः |
| तस्मिन् | तयोः | तेषु | - सप्तमी विभक्तिः |

AP SCERT

# धातुरूपाणि

## परस्मैपदिधातुरूपाणि

### १. वद - व्यक्तायां वाचि

**वर्तमाने लट्**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| वदति | वदतः | वदन्ति |
| वदसि | वदथः | वदथ |
| वदामि | वदावः | वदामः |

**भविष्यति लृट्**

| | | |
|---|---|---|
| वदिष्यति | वदिष्यतः | वदिष्यन्ति |
| वदिष्यसि | वदिष्यथः | वदिष्यथ |
| वदिष्यामि | वदिष्यावः | वदिष्यामः |

**अनद्यतनभूते लङ्**

| | | |
|---|---|---|
| अवदत् | अवदताम् | अवदन् |
| अवदः | अवदतम् | अवदत |
| अवदम् | अवदाव | अवदाम |

**विध्याशिषोः लोट्**

| | | |
|---|---|---|
| वदतु, वदतात् | वदताम् | वदन्तु |
| वद, वदतात् | वदतम् | वदत |
| वदानि | वदाव | वदाम |

**विधिलिङ्**

| | | |
|---|---|---|
| वदेत् | वदेताम् | वदेयुः |
| वदेः | वदेतम् | वदेत |
| वदेयम् | वदेव | वदेम |

### २. प्रच्छ - ज्ञीप्सायाम्

**वर्तमाने लट्**

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| पृच्छति | पृच्छतः | पृच्छन्ति | प्रथमपुरुषः |
| पृच्छसि | पृच्छथः | पृच्छथ | मध्यमपुरुषः |
| पृच्छामि | पृच्छावः | पृच्छामः | उत्तमपुरुषः |

**भविष्यति लृट्**

| | | | |
|---|---|---|---|
| प्रक्ष्यति | प्रक्ष्यतः | प्रक्ष्यन्ति | प्रथमपुरुषः |
| प्रक्ष्यसि | प्रक्ष्यथः | प्रक्ष्यथ | मध्यमपुरुषः |
| प्रक्ष्यामि | प्रक्ष्यावः | प्रक्ष्यामः | उत्तमपुरुषः |

**अनद्यतनभूते लङ्**

| | | | |
|---|---|---|---|
| अपृच्छत् | अपृच्छताम् | अपृच्छन् | प्रथमपुरुषः |
| अपृच्छः | अपृच्छतम् | अपृच्छत | मध्यमपुरुषः |
| अपृच्छम् | अपृच्छाव | अपृच्छाम | उत्तमपुरुषः |

**विध्याशिषोः लोट्**

| | | | |
|---|---|---|---|
| पृच्छतु, पृच्छतात् | पृच्छताम् | पृच्छन्तु | प्रथमपुरुषः |
| पृच्छ, पृच्छतात् | पृच्छतम् | पृच्छत | मध्यमपुरुषः |
| पृच्छानि | पृच्छाव | पृच्छाम | उत्तमपुरुषः |

**विधिलिङ्**

| | | | |
|---|---|---|---|
| पृच्छेत् | पृच्छेताम् | पृच्छेयुः | प्रथमपुरुषः |
| पृच्छेः | पृच्छेतम् | पृच्छेत | मध्यमपुरुषः |
| पृच्छेयम् | पृच्छेव | पृच्छेम | उत्तमपुरुषः |

AP SCERT

## ३. क्रीडृ - विहारे

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| क्रीडति | क्रीडतः | क्रीडन्ति | प्रथमपुरुषः |
| क्रीडसि | क्रीडथः | क्रीडथ | मध्यमपुरुषः |
| क्रीडामि | क्रीडावः | क्रीडामः | उत्तमपुरुषः |

### भविष्यति लृट्

| | | | |
|---|---|---|---|
| क्रीडिष्यति | क्रीडिष्यतः | क्रीडिष्यन्ति | प्रथमपुरुषः |
| क्रीडिष्यसि | क्रीडिष्यथः | क्रीडिष्यथ | मध्यमपुरुषः |
| क्रीडिष्यामि | क्रीडिष्यावः | क्रीडिष्यामः | उत्तमपुरुषः |

### अनद्यतनभूते लङ्

| | | | |
|---|---|---|---|
| अक्रीडत् | अक्रीडताम् | अक्रीडन् | प्रथमपुरुषः |
| अक्रीडः | अक्रीडतम् | अक्रीडत | मध्यमपुरुषः |
| अक्रीडम् | अक्रीडाव | अक्रीडाम | उत्तमपुरुषः |

### विध्याशिषोः लोट्

| | | | |
|---|---|---|---|
| क्रीडतु, क्रीडतात् | क्रीडताम् | क्रीडन्तु | प्रथमपुरुषः |
| क्रीड, क्रीडतात् | क्रीडतम् | क्रीडत | मध्यमपुरुषः |
| क्रीडानि | क्रीडाव | क्रीडाम | उत्तमपुरुषः |

### विधिलिङ्

| | | | |
|---|---|---|---|
| क्रीडेत् | क्रीडेताम् | क्रीडेयुः | प्रथमपुरुषः |
| क्रीडेः | क्रीडेतम् | क्रीडेत | मध्यमपुरुषः |
| क्रीडेयम् | क्रीडेव | क्रीडेम | उत्तमपुरुषः |

## ४. हस- हसने

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| हसति | हसतः | हसन्ति | प्रथमपुरुषः |
| हससि | हसथः | हसथ | मध्यमपुरुषः |
| हसामि | हसावः | हसामः | उत्तमपुरुषः |

### भविष्यति लृट्

| | | | |
|---|---|---|---|
| हसिष्यति | हसिष्यतः | हसिष्यन्ति | प्रथमपुरुषः |
| हसिष्यसि | हसिष्यथः | हसिष्यथ | मध्यमपुरुषः |
| हसिष्यामि | हसिष्यावः | हसिष्यामः | उत्तमपुरुषः |

### अनद्यतनभूते लङ्

| | | | |
|---|---|---|---|
| अहसत् | अहसताम् | अहसन् | प्रथमपुरुषः |
| अहसः | अहसतम् | अहसत | मध्यमपुरुषः |
| अहसम् | अहसाव | अहसाम | उत्तमपुरुषः |

### विध्याशिषोः लोट्

| | | | |
|---|---|---|---|
| हसतु, हसतात् | हसताम् | हसन्तु | प्रथमपुरुषः |
| हस, हसतात् | हसतम् | हसत | मध्यमपुरुषः |
| हसानि | हसाव | हसाम | उत्तमपुरुषः |

### विधिलिङ्

| | | | |
|---|---|---|---|
| हसेत् | हसेताम् | हसेयुः | प्रथमपुरुषः |
| हसेः | हसेतम् | हसेत | मध्यमपुरुषः |
| हसेयम् | हसेव | हसेम | उत्तमपुरुषः |

AP SCERT

# आत्मनेपदिधातुरूपाणि

## ५ वदि - अभिवादनस्तुत्योः

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| वन्दते | वन्देते | वन्दन्ते |
| वन्दसे | वन्देथे | वन्दध्वे |
| वन्दे | वन्दावहे | वन्दामहे |

### भविष्यति लृट्

| | | |
|---|---|---|
| वन्दिष्यते | वन्दिष्येते | वन्दिष्यन्ते |
| वन्दिष्यसे | वन्दिष्येथे | वन्दिष्यध्वे |
| वन्दिष्ये | वन्दिष्यावहे | वन्दिष्यामहे |

### अनद्यतनभूते लङ्

| | | |
|---|---|---|
| अवन्दत | अवन्देताम् | अवन्दन्त |
| अवन्दथाः | अवन्देथाम् | अवन्दध्वम् |
| अवन्दे | अवन्दावहि | अवन्दामहि |

### विध्याशिषोः लोट्

| | | |
|---|---|---|
| वन्दताम् | वन्देताम् | वन्दन्ताम् |
| वन्दस्व | वन्देथाम् | वन्दध्वम् |
| वन्दै | वन्दावहै | वन्दामहै |

### विधिलिङ्

| | | |
|---|---|---|
| वन्देत | वन्देयाताम् | वन्देरन् |
| वन्देथाः | वन्देयाथाम् | वन्देध्वम् |
| वन्देय | वन्देवहि | वन्देमहि |

## ६ भाष - व्यक्तायां वाचि

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| भाषते | भाषेते | भाषन्ते | प्रथमपुरुषः |
| भाषसे | भाषेथे | भाषध्वे | मध्यमपुरुषः |
| भाषे | भाषावहे | भाषामहे | उत्तमपुरुषः |

### भविष्यति लृट्

| | | | |
|---|---|---|---|
| भाषिष्यते | भाषिष्येते | भाषिष्यन्ते | प्रथमपुरुषः |
| भाषिष्यसे | भाषिष्येथे | भाषिष्यध्वे | मध्यमपुरुषः |
| भाषिष्ये | भाषिष्यावहे | भाषिष्यामहे | उत्तमपुरुषः |

### अनद्यतनभूते लङ्

| | | | |
|---|---|---|---|
| अभाषत | अभाषेताम् | अभाषन्त | प्रथमपुरुषः |
| अभाषथाः | अभाषेथाम् | अभाषध्वम् | मध्यमपुरुषः |
| अभाषे | अभाषावहि | अभाषामहि | उत्तमपुरुषः |

### विध्याशिषोः लोट्

| | | | |
|---|---|---|---|
| भाषताम् | भाषेताम् | भाषन्ताम् | प्रथमपुरुषः |
| भाषस्व | भाषेथाम् | भाषध्वम् | मध्यमपुरुषः |
| भाषै | भाषावहै | भाषामहै | उत्तमपुरुषः |

### विधिलिङ्

| | | | |
|---|---|---|---|
| भाषेत | भाषेयाताम् | भाषेरन् | प्रथमपुरुषः |
| भाषेथाः | भाषेयाथाम् | भाषेध्वम् | मध्यमपुरुषः |
| भाषेय | भाषेवहि | भाषेमहि | उत्तमपुरुषः |

AP SCERT

# पदकोशः

## अ

अग्रजन्मा = బ్రాహ్మణుడు
अर्घ्यपात्रानुमितव्ययस्य = చేత ధరించిన మట్టి అర్ఘ్యపాత్ర చేతనే ఊహింపబడిన డబ్బంతా ఖర్చయిపోయిన వాని యొక్క
अधिजग्मुषः = అన్నింటిని పొందినవాడైన వానికి (రఘుమహారాజునకు)
अधितिष्ठता = కూర్చున్న వాని చేత
अध्वरे = యజ్ఞంలో
अनवाप्य = పొందకుండా
अनन्यकार्यः = ఇతరములైన పనులు లేనివాడు
अनर्घशीलः = వెలలేనంత గుణసంపద గలవాడు
अनालस्यं = సోమరితనము లేని
अन्तराले = మధ్యలో
अप्रमादं = పొరపాటు లేని
अयः = ఇనుము
अर्थिकामादधिकप्रदः = యాచకుడు కోరిన దాని కంటే ఎక్కువ ఇచ్చువాడు
अल्पेतरत्वात् = కొంచెం కంటే ఇతరమైనది, ఎక్కువయైనది అగుట వలన
अवशिष्टः = మిగిలిపోయినవాడు (వాడవు నీవు)
अहर्निशम् = పగలూ రాత్రి

## आ

आकर्ण्य = విని
आतिथेयः = ఆతిథ్యం ఇచ్చేవాడు, గృహస్థుడు
आनतपूर्वकायम् = ముందుకు వంచబడిన తలకలవాడైన వానిని (రఘుమహారాజును)
आपद्गतम् = ఆపదను పొందిన
आरण्यकोपात्तफलप्रसूतिः = వనవాసుల చేత తీసుకోబడిన పంట గలది
आरात् = సమీపంలో
आत्तसारम् = ముందే పొందబడిన సంపద అను సారము కలదైన దానిని (భూమిని)

## इ

इमाम् = దీనిని

## उ

उच्छिष्टेन = విడిచిపెట్టినదానిచే / వదిలివేసిన దానిచే
उद्यमः = ప్రయత్నం
उपगतवान् = పొందెను
उपात्तविद्यः = విద్యాభ్యాసాన్ని పూర్తి చేసినవాడు
उपेत्य = పొంది
उष्ट्रवामीशतवाहितार्थम् = వందల కొలది ఒంటెలు, కంచర గాడిదలపై పంపిన సంపద కలవాడైన వానిని (రఘుమహారాజును)

## ए

एकसूत्रता = ఒక్క తాటిమీదికి వచ్చుట

## क

कदलीपर्णम् = అరటి ఆకు
कलाक्षयः = కళలు తరిగి పోవుట
कल्पितशस्त्रगर्भम् = ఆయుధములు మధ్యలో కలదానిగా (రథమును)
कार्यः = చేయవలసినది
कुक्कुटात् = కోడినుండి
कैलासनाथम् = అలకాధిపతియైన కుబేరుని
कोटरे = తొర్రయందు
कामनाम् = కోరికను

## ख

ख्यातिः = కీర్తి

## ग

गणनीयम् = లెక్కపెట్టాలి
गर्दभात् = గాడిద నుండి
गहनारण्ये = దట్టమైన అడవిలో
गह्वरे = గుహలో
गर्ह्यः = నిందించదగినవాడు
गाम् = మాటను, భూమిని
गुरुप्रदेयाधिकनिःस्पृहः = గురువుగారికి ఇవ్వవలసినదానికంటే ఎక్కువను కోరనివాడు
गोपनीयम् = దాచిపెట్టదగినది

## घ

घनान्धकारे = గాఢాంధకారంలో

AP SCERT

**च**

चिन्तनम् = ఆలోచన

**ज**

जम्बुकः = నక్క
जागरणीयम् = మేల్కొని ఉండాలి
जागरितः = మేల్కొనబడినవాడై
जातु = ఒకసారి
जिगीषुः = గెలవాలనే కోరిక కలవాడు

**त**

तमिस्रा = చీకటిరాత్రి
तरणीयम् = దాటాలి (ఈదాలి)
तारयन्त्रादिवत् = ఫోను మొదలగు వాటిలాగా
तीर्थप्रति - पादितर्द्धिः = యోగ్యులైనవారికి అర్పించిన ఐశ్వర్యముగలవాడు (వాడవు)
तूष्णीम् = ఊరకనే
त्वयि नाथे = నీవు రాజుగా ఉండగా
त्यक्त्वा = విడిచిపెట్టి
त्वरणीयम् = త్వరపడాలి

**द**

दुर्बलाशः = సన్నగిల్లిన ఆశగలవాడు
द्विजराज - कान्तिः = చంద్రునివంటి కాంతిగలవాడు
द्वितीयम् - आश्रमम् = గృహస్థాశ్రమమును
द्वित्राणि = రెండుమూడు (రోజులను)

**न**

निजसौख्यम् = స్వసుఖం (తన సుఖం)
निजोदरम् = తన పొట్టను
निभृतम् = మిక్కిలి
नियोगक्रियया = నియమించుట అనుక్రియ చేత (ఆజ్ఞ చేత)
निरीक्षा = ఎదురుచూపు
निर्गलिता - म्बुगर्भम् = పూర్తిగా వర్షించిన నీరు గలదైన
निर्वाहयितुम् = నిర్వహింపజేయుటకు
निशम्य = విని
निषिध्य = ఆపి, నివారించి

**प**

पठनम् = చదువుట
परः = ఇతరుడు, శత్రువు
परिवर्तनम् = మార్పు
परीवाद - नवावतारः = కొత్త అపకీర్తి, కొత్త అపవాదము
परेषाम् = ఇతరులకి (కు) / యొక్క
परोच्छिष्टोप - जीवी = ఇతరులచే వదిలిన దానిపై జీవించేవాడు
पाठनम् = చదివించుట
पादकन्दुकः = కాలి బంతి
पादाभ्याम् = రెండుకాళ్ళచేత / కొరకు / వలన
प्रतीक्षा = ఎదురుచూపు
प्रदोषे = సాయంకాలమున
प्राप्य = పొంది
प्रभुशब्दशेषम् = 'రాజు' అనే పేరు మాత్రమే మిగులుగా గల
प्रभूतकार्य = ఎక్కువైన పనిని
प्रभूतम् = మిక్కిలి
प्रयाणाभि - मुखाय = ప్రయాణం చెయ్యాలని ఉద్యుక్తుడైనవానికొరకై (రఘుమహారాజుకై)
प्रशस्ते = కొనియాడదగిన దాని యందు (కొనియాడదగిన నా అగ్నిగృహమునందు)
प्रेषितवान् = పంపించాడు

**फ**

फलदाता = ఫలాన్ని ఇచ్చేవాడు

**ब**

बकात् = కొంగనుండి
बह्वाशी = బాగా భుజించిన
बाष्पयान - प्रभृतीनि = రైలు మొదలైన వాహనాలు
बुभुजे = తినెను

**भ**

भयाकुलः = భయగ్రస్తుడైన, భయము చేత దుఃఖితుడై
भृशम् = మిక్కిలి
भ्रमणीयम् = తిరగాలి

**म**

मननीयम् = ఆలోచించాలి
मांसगन्धम् = మాంసపు వాసనను
मानधना - ग्रयायी = ఆత్మగౌరవం కలవారిలో ముందు ఉండేవాడు
मार्गश्रमात् = దారివలన (ప్రయాణం వలన) ఏర్పడిన ఆయాసం వలన

AP SCERT

मार्गोल्लङ्घनम् = దారిని దాటుట
मिलित्वा = కలసి
मुधा = వ్యర్థంగా

**य**

यथागतम् = వచ్చిన విధంగా / వచ్చిన దానిని అతిక్రమించకుండా
यथावद्विहिताध्वराय = శాస్త్రప్రకారం యజ్ఞం చేసినవాడైన
यशः = కీర్తిని
योजना = ప్రణాళిక

**र**

राजतिलकः = రాజశ్రేష్ఠుడు
रमणीयम् = సంతోషించాలి (సుఖించాలి) / అందమైన
रुग्णः = రోగం కలిగినదై
रुग्णशृगालवत् = జబ్బుపడిన నక్క వలె

**ल**

लोहः = ఉక్కు

**व**

वज्रभिन्नम् = వజ్రాయుధంతో ఖండించబడినదైన దానిని (మేరుపర్వతపు భాగమును)
वत्स ! = ఓ బిడ్డా / ఓ కొడుకా !
वदनीयम् = చెప్పాలి
वदान्यान्तरम् = మరొకదాతను గురించి
वन्यपशुम् = అడవి జంతువును
वराकः = మూర్ఖుడు
वर्णी = బ్రహ్మచారి
वसुधा = భూమి
वस्तुक्रयणस्य = వస్తువులను కొనడానికి
वस्तुसङ्ग्रहम् = వస్తువులను పోగుచేసుకోవడం గురించి
वायसात् = కాకినుండి
विक्रयणस्य = అమ్మడానికి
विडम्बनम् = మారువేషం, కప్పిపుచ్చుకోవడం, అనుకరణం
विद्यापरिसंख्यया = నేర్చిన విద్యల సంఖ్యతో
विपत्तिविपिने = ఆపదలు అనెడి అరణ్యంలో
विशांपतिः = రాజు, మానవులకు అధిపతి
वृक्षकोटरम् = చెట్టుతొర్రను

**श**

शयनीयम् = నిద్రపోవాలి
शीघ्रचेतनः = వెంటనే మేలుకునే, వెంటనే స్పందించే
शुनः = కుక్క నుండి
शृगालः = నక్క
श्रुतपारदृश्वा = శాస్త్రాలసముద్రము యొక్క అంతుచూచిన వాడు (శాస్త్రాలు బాగా తెలిసినవాడు)
श्लाघ्यतरः = మిక్కిలి పొగడతగినది, శ్రేష్ఠమైనది

**स**

संप्रस्थितः = బయలుదేరినవాడు (కౌత్సుడు)
सङ्क्रमितुम् = పొందడానికి
सततम् = ఎల్లప్పుడు
सपर्याविधिभाजनेन = ఆతిథ్యమివ్వడానికి ఉపయోగించిన పాత్రచేత
सम्भावयितुम् = గౌరవించుటకు
संयम्य = నియమించుకుని
सर्वोपकारक्षमम् = అందరికి ఉపకారం చెయ్యడానికి యోగ్యమైనదానిని (గృహస్థాశ్రమమును)
ससन्तोषः = సంతోషముతో కూడిన వాడు
साकेतनिवासिनः = అయోధ్యానగరమున నివసించువానికి, (అయోధ్యాజనానికి)
सुखशयने = మెత్తని పరుపుపై
सुनिद्रः = మంచి నిద్రగల
सुविधा = సౌకర్యం
सुविस्मितः = బాగా ఆశ్చర్యపడినవాడై
सूपम् = పప్పును
स्थाने = తగియున్నది, తగును
स्मरणीयम् = స్మరించాలి (ఆలోచించాలి)
स्वस्ति = శుభం
स्वयमुद्योगी = తన ప్రయత్నం కలిగినవాడై
स्वावलम्बनम् = తనపై తాను ఆధారపడటం (తన పని తానే చేసుకోవడం)
स्वावलम्बनः = తనపై తాను ఆధారపడినవాడిగా
स्वाध्यायः = వేదాధ్యయనము, తాను చదువదగిన గ్రంథమును చదువుట
स्वार्थोपपत्तिम् = తాను ఆశించినదానిని పొందుటను గూర్చి

**ह**

हत्वा = చంపి
हन्त! = అయ్యో!
हिमांशोः = చంద్రుని యొక్క

AP SCERT

# क्रियापदकोशः

**अ**

| | | |
|---|---|---|
| अगच्छत् | = | వెళ్ళెను |
| अगणयत् | = | లెక్కించెను |
| अतिष्ठत् | = | నిలబడెను / ఉండెను |
| अदृश्यत | = | కనబడింది |
| अन्वयुङ्क्त | = | అడిగెను |
| अपश्यत् | = | చూసెను |
| अपेक्ष्यते | = | కోరబడుచున్నది |
| अभूत् | = | ఉండెను / ఆయెను |
| अशिक्षयत् | = | నేర్పించెను |
| अर्हसि | = | యోగ్యుడవై ఉన్నావు |

**आ**

| | | |
|---|---|---|
| आचचक्षे | = | చెప్పెను |
| आचर्यते | = | ఆచరించ బడుచున్నది |
| आयाति | = | వచ్చుచున్నది / రాగలదు |
| आश्वासयाञ्चकार | = | ఊరడించెను |
| आहर | = | తీసికొనిరమ్ము |

**उ**

| | | |
|---|---|---|
| उपतस्थौ | = | సమీపించెను |
| उपार्जयेः | = | సంపాదించు |
| उवाच | = | పలికెను |

**क**

| | | |
|---|---|---|
| कुर्याम | = | (మనం) చేయాలి |

**च**

| | | |
|---|---|---|
| चकमे | = | కోరెను |
| चकार | = | చేసెను |

**ज**

| | | |
|---|---|---|
| जगाद | = | చెప్పెను |
| जाने | = | తెలుసుకొనుచున్నాను |

**द**

| | | |
|---|---|---|
| दिदेश | = | ఇచ్చెను |
| द्योतयति | = | వ్యక్తపరచుచున్నది |

**न**

| | | |
|---|---|---|
| न+अर्दति | = | యాచించదు |
| निवेदयामास | = | నివేదించెను |

**प**

| | | |
|---|---|---|
| पूरयामास | = | నింపుకొనెను |
| पूरयेत् | = | నింపాలి / పూరించాలి |
| प्रत्यग्रहीत् | = | స్వీకరించెను |
| प्रत्युज्जगाम | = | ఎదురు వెళ్ళెను |
| प्रपेदे | = | పొందెను |
| प्रयच्छ | = | ఇవ్వు |
| प्रातिष्ठत | = | బయలుదేరెను |
| प्रापत् | = | పొందెను |
| प्रोवाच | = | చెప్పెను |

**भ**

| | | |
|---|---|---|
| भवेः | = | అగు / ఉండు |
| भवेत् | = | అగును |
| भिद्यते | = | భేదింపబడుచున్నది/ వేరుచేయబడుచున్నది |

**म**

| | | |
|---|---|---|
| मा भूत् | = | కావద్దు |

**य**

| | | |
|---|---|---|
| यते | = | ప్రయత్నిస్తాను |
| यतिष्ये | = | ప్రయత్నిస్తాను (భవిష్యత్) |
| याति | = | వెళ్ళుచున్నాడు / వెళ్ళుచున్నది |

**ल**

| | | |
|---|---|---|
| लभस्व | = | పొందుదువుగాక |
| ललज्जे | = | సిగ్గుపడెను |
| लेभे | = | పొందెను |

**व**

| | | |
|---|---|---|
| वाञ्छामि | = | కోరుచున్నాను |
| वाञ्छसि | = | కోరుచున్నావు |
| विद्यते | = | కలదు, ఉన్నది |
| व्यचिन्तयत् | = | ఆలోచించెను |
| व्यलीयत | = | లీనమయ్యెను |
| व्याप्नुयात् | = | ప్రసరించాలి |

**श**

| | | |
|---|---|---|
| शक्यते | = | సాధ్యమగుచున్నది |
| शशंसुः | = | చెప్పిరి |

**स**

| | | |
|---|---|---|
| सुष्वाप | = | నిద్రించెను |

AP SCERT